CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 138 Subject: Dharmaśāstra.

Title: Jyeṣṭhavidhāna paddhati and/or 2
Karmasamuccaya grantha

Author: — Scribe: Viśvanātha Dvivedi.

Date of the work: — Date of the Ms.: V.S. 1907

Place of the work: — Place of the Ms.: Surat

Size: 9.1" by 4.1" (1st fol. 8.5" by 4.8") Extent: Fol 80, 1, 2, No 49 to 54 are missing.

Language: Sanskrit Script: Devanāgarī

Remarks: incomplete. Fol. 49 to 54 missing. 1st fol. different size and different handwriting see No 124.

६ श्रन्निषेकादिमांगल्यं नार्यास्तु त्रस्यान्वितस्य च। प्रणीतानां विमोकादि शांत्यंतावकुशं
डिका॥ विसर्जनं ग्रहादीनां पदार्थानामयं क्रमः॥ स्थानगोत्रमविज्ञाय होमं यः कुरुते द्वि
जः॥ न तत्फलमवाप्नोति निर्वर्त्यंतिति ग्रहाः॥ अर्कोजितः कलिंगेषु यामुनेषु च चंद्रमाः॥ अं
गारकस्तथावंत्यां बुधोयं कोशले स्मृतः॥ शुक्रो भोजकटे जातः पश्चाद्देशे बृहस्पतिः॥ शनै
श्चरस्तु सौराष्ट्रे राहुर्बर्बरके तथा। पर्वतपर्वतिविवजाताः सर्वत्र केतवः॥ काश्यपसगोत्र
मादित्याय॥ आंगिरसगोत्रं बृहस्पतये॥ कौरव्यसगोत्रं शुक्राय॥ काश्यपसगोत्रं शनैश्चरा
य॥ जैमिनिसगोत्रं राहवे॥ पैठीनसिगोत्रं केतुभ्यः॥२॥ गुरुर्द्विजस्तु गुनंदनश्च तत्र च स्त

याधिरणीसुतस्याविरुयः शार्शाकः शशिनंदनस्य।शाषास्यस्तूशगणानवरामताः।आ
दित्यस्य विशाखे तु वं ३ स्ये व च रुत्तिकाः।पूर्वाषाढा तु मित्रस्य धनिष्ठे व बुधस्य वा गुरोरु
त्तर फल्गुन्यौ शुक्रस्य तु श्रवन दत्तं।शनिश्चरा दिणे ३ राहोर्नरणिरुच्यात।केतुश्चस्य तथा
श्लेषा नक्षत्राणि स्मृतानि दि॥ सप्तम्यां भास्करो जातो ऽष्टम्यां भास्करनंदनः।नवम्यां भार्गवो
जातो दशम्यां मंगलस्तथा।एकादश्यां गुरु जातो द्वादश्यां बुधस्तथा।सोमः तु त्रयोद
श्यां राहु जातिस्तु पूर्णिमा॥ यावद्दिनं न पश्यंति तावज्जातास्तु केतवः।आदित्य [illegible]
नाम पिंगलः सोमस्तु च्यते।धूमकेतुस्तथा भौमो जठराग्नि बुधस्मृतः।गुरोश्चिव शिखीनाम २

शुक्रिन व तिहाटकः।शनैश्चरे महातेजा राहुः।केतु कृताशनः॥३॥ अथ विधिः॥ मंडपः षो
लशहस्तं नः।कुंडं चतुर्हस्तं।विशालं सर्वतः।अंगुल १२ उच्छ्रायः।एवं विधं कर्त्तव्यं।ततो वरणं।
आचार्य १ ब्रह्माणं ब्राह्मणाः २ जापकः १ तस्य प्रकारः।उदङ्मुखो यजमान उपविशति।आ
चार्यः पूर्वाभिमुखः।तत्र यजमानः प्रयोगं पठेत्।अद्य श्री ब्रह्मणो द्वितीय प्रहरार्धे श्री श्वेतवारा
हकल्पे विवस्वत मन्वंतरे अष्टाविंशतितमे कलियुग प्रथम विभागे श्री मन्नृप विक्रमार्कस
मयातीत संवत्सराणां यथा संख्यानुक्रम काले सति श्री शालिवाहन शाके श्री विष्णोर्बौद्धावता
रे अमुनाम्नि संवत्सरे अमुकायन गते सवितरि अमुक ऋतौ महामांगल्यप्रदे अमुकमास

पक्षेतिथौवासरेनक्षत्रेयोगेकरणेअमुकस्थेचंद्रेअमुकस्थेसवितरिअमुकस्थेदेवगुरौशे
षेषुग्रहेषुयथास्थानस्थितेषुसत्सुएवंगणविशिष्टेपुण्यकालेदेशेचजंबूद्वीपेभारतवर्षे
कुमारिकाक्षेत्रांतरवर्तिनिश्रीसोमेश्वरक्षेत्रेआर्यावर्तांतर्गतब्रह्मावर्त्तिकादेशेतपत्याःदक्षि
णतटेअस्मिन्सकलकल्याणवतिमंडपायतनेदेवब्राह्मणानांसंनिधौएवंगुणविशिष्टेपुण्य
कालेदेशेचसुतस्यविवाहोत्सवकर्मप्रारंभनिमित्तंसर्वानिष्टपरिहारार्थंसर्वकामसमृद्ध्यर्थंस
र्वदुरितापशांत्यर्थंअविघ्नेनकर्मणांसिद्ध्यर्थंच।गणेशांबिकयोःप्रीत्यर्थंआदित्यादिनवग्रहा
णांप्रीत्यर्थंआदित्यादिनवग्रहाणांसानुकूलार्थंनवग्रहशांतिककर्मणिऋत्वेदहत्तेआचार्य २

एतत्तेपाद्यं।एषवोऽर्घः।इज्याःस्वस्तिनइंद्रोवृ०।पादप्रक्षालनं।आचमनं।एवंसर्वेषांय
जुर्वेदमूर्तेएतत्तेपाद्यं।इत्यादि।ततःआत्मपादप्रक्षालनं।आचमनं।ॐडाग्रेआचार्यःपूर्वा
भिमुखःउपविशेत्।।यजमानउत्तराभिमुखः।आचमनंप्राणायामंकुर्यात्।पुनराचमनं।
श्रीगणेशायनमः।३अपवित्रःपवित्रोवा०विः।इदंविष्णु०रोसप्तद्याध्म०नमःस्वाहायै
०३स्पर्शाद्य।।वरुणआद्योपद्रारक्षणंपवित्रतास्तु।इत्यादि।उपास्मै०धु।३अत्राद्यमासेपक्षे
तिथौदिनेयथावर्त्तमाननक्षत्रयोगकरणपर्वमुहूर्तसमवायेएवंगुणविशिष्टायांपुण्य
तिथौसुतस्यविवाहो०र्थंचनवग्रहशांतिककर्मणिआचार्यप्रमुखानांऋत्विजांजापकानां

वरणमहं करिष्ये॥ कुरुष्वेति ब्राह्मणः॥ ततो यजमान अक्षतान् गृहीत्वा आचार्यस्य दक्षि
णे जानो अन्वारंभः कर्त्तव्यः॥ अनेन प्रकारेण॥ अमुकसगोत्र अमुकशर्मन्नृधे
न्वाद्यक्त्र दक्षिणेन सार्वकामिकेन स्थालीपाकेनाहं यक्ष्ये तत्र त्वामाचार्यं वृणे। वृतोस्मि॥
इत्याचार्यः कथयति। युष्मान् ऋत्विग्ज्ञापकान् वृणे। वृतास्मः इति ते कथयंति। अत्र चंदनादि
पूजा ब्राह्मणानां। यथादत्तं गंधाद्यर्चनं आचार्यप्रमुख ऋत्विग्ज्ञापकेभ्योऽहं संप्रददे। इमा
नि अर्चितानि ज्योतीषि अर्चनविधेः परिपूर्णतास्तु। आचमनं। पूरादिः। अद्दंन्नमी॰दरी॥
यथादास्यमानानि दक्षिणापर्यंतानि भोजनानि आचार्यप्रमुखेभ्यो ऋत्विग्भ्यः संप्रददे। पुण्या ४

हं दीर्घमा॰ शि॰ सो॰ अ॰ दी॰ पु॰ हृ॰ ध॰ इ॰ अ॰ यत्॰ द्धि॰ तु॥ अस्य ऋत्विग्ज्ञापकवरणक
र्मणः प्रतिष्ठासिध्यर्थं हिरण्यद॰ व्यं आचार्य॰ दे॥ जलं जलं॥ योयस्य विभागः सः स्वीक्रिय
तां॥ दक्षिणाः पांचित्यादि॥ आदित्याद्याः ग्रहाः प्रीयंतां। प्रजापतिः प्रीयतां। स्थावर॰ जं॰ ग
त्वरे॰ स्तु॥ अभिवादयामि। सर्वैः पुण्याहकालो वाच्यतां। पुण्याहं भवंतो ब्रुवंतु॥ ३ कल्या
णं भवंतो॰ ब्रु॰ ३ ऋद्धिं॰ ३ स्वस्तिं भ॰ ब्रु॰ ३ अस्य ऋत्विग्ज्ञापकवरणकर्मणो यन्न्यूनातिरिक्तं॰ स्तु
गृहे॰ अ॰ मस्तु॥ यजमानस्य मांगल्यकरणं। आशीर्वादाश्च। एंद्राबार्हिः सीदतु पिन्वतामि
ला बृहस्पतिः सामभिरृक्को अर्चतु। सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणी

महे॥१॥उपक्षये सुदध्वं मारुतं गणं पावकमृष्वं सख्याय शंभुवं। रायस्पोषं सौश्रवसाय धी
महि तद्देवानामवो अद्या वृणीमहे॥२॥ये स्थामनोर्यज्ञियास्ते शृणोतन तद्वो देवा ईमहे त
द्दधातन। जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे॥३॥महदद्य महता
मा वृणीमहे वो देवानां बृहतामनर्वणां। यथा वसु वीरजातं निशामहै तद्देवानामवो अद्या वृ
णीमहे॥४॥यजस्व वीर प्रविहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये। हविष्कृणुष्व सुभगो य
थाससि ब्रह्मणस्पतेरव आवृणीमहे॥५॥नालिकेरं गृहीत्वा। अस्य यागस्य निष्पत्त्ये नवं
तान्यर्थिता मया। सुप्रसादप्रकर्तव्यं शांतिकं विधिपूर्वकं॥ इति ऋत्विग्वरणं॥ इति वरणप्र ५

डं॥ततः कुशकंडी॥ आचमनं प्राणायामः। स्वस्त्ययनं पंचभूसंस्काराग्निं प्रणयामि
परिसमूहनं। आघारकं। ब्रह्मासनं। प्रणीतासनं। आत्मासनं च। अग्नेर्दक्षिणतो ब्रह्म
स्थापनं। भूर्भुवः स्वरिति पुष्पैरर्चनं। उत्तरतः प्रणीताप्रणयनं। को वः प्रणीति दक्षि
णं जान्वाच्य स्तरणं। प्रादेशेन मापयित्वा कुशेन छिनत्ति पवित्रे स्थ इति पवित्रछेदनं। वैष्ण
व्यामित्यभ्युक्षणं। कुशास्तरणान्यां प्रदक्षिणमग्निं त्रिः पर्युक्ष्य। मद्गीनां पयोसीत्याज्यस्थाली
मादाय। इषे त्वा इत्यधिश्रित्य। स्रुवः प्रतपनं। प्रोक्षणं। संमार्जनं। प्रोक्षणं। पुनः प्रतपनं।
प्रोक्षणं। स्रुवमग्ना गप्रतपनं। प्रोक्षणं। मेक्षणस्य स्रुग्वत्। कुशैर्त्वा। उदगुद्वास्य। स्रुवेणद

कं कृत्वा ॥ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ आज्यसंस्का
रः ॥ सवितुर्वः उदकसंस्कारः ॥ हविर्ग्रहणं ॥ आदित्यसोमांगारकबुधबृहस्पतिशुक्रशनैश्च
रराहुकेतुभ्यो जुष्टं गृह्णामि ॥ २ चतुर्थं गृह्णी ॥ आदित्यादिनवग्रहेभ्यो जुष्टमासादयामि ॥ आ
दित्यादिकेतुपर्यंतेभ्यो जुष्टं प्रोक्षामि ॥ सपवित्रेणोदकेन प्रोक्षणं ॥ समिदादिकं प्रोक्ष्य ॥
चोषोदकं प्रणीतासु मुक्त्वा त्रिः प्रक्षालनमधिश्रयणं ॥ ग्रहादिस्थापनं ॥ सूर्यः सोमो मही
पुत्रः सोमपुत्रो बृहस्पतिः ॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ॥ इति याज्ञव ६
ल्क्यः ॥ वृत्तमंडलमादित्याय ॥ चतुरस्रं सोमाय ॥ त्रिकोणमंगारकाय ॥ बाणाकारं बुधाय ॥ दी

र्घचतुरस्रं बृहस्पतये ॥ पंचकोणं शुक्राय ॥ धनुः शनैश्चराय ॥ शूर्पाकारं राहवे ॥ ध्वजाका
रं केतवे ॥ ताम्रकात् स्फाटिकात् रक्तचंदनात् स्वर्णकावुभौ ॥ रजतादायसः सीसात् कांस्य
काद्ग्रहान्क्रमात् ॥ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा ॥ इति याज्ञवल्क्यः ॥ द्वादशां
गुलं लिखेत्सूर्यं सोमं च द्विगुणं लिखेत् ॥ चतुरंगुलं लिखेद्भौमं बुधं च चतुरंगुलं ॥ गुरुं षडंगु
लं चैव लिखेच्छुक्रं नवांगुलं ॥ चतुरंगुलं लिखेत्सौरिं सोमाद्द्व्यंगुलाधिकं लिखेद्राहुं त
ततः केतुं मध्यमांगुलमेव च ॥ मध्ये तु भास्करं विद्यात् शशिनं पूर्वदक्षिणे ॥ दक्षिणे लोहि
तं विद्यात् बुधं पूर्वोत्तरेण तु ॥ उत्तरे तु गुरुं विद्यात् पूर्वेणैव तु भार्गवं ॥ पश्चिमे तु शनिं विद्याद्

कुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतु स्थापयेच्छुक्लतंडुलैः। शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरु
सौम्यावुदङ्मुखौ। प्रत्यङ्मुखान्यानि सोमः शेषा दक्षिणतोमुखाः॥ अग्निरापो धरा विष्णु
रिंद्राणी प्रजापतिः। सार्पराज्ञी तथा ब्रह्मा ग्रहाणां देवताः स्मृताः। ईश्वरो मे तथा स्कंद
स्तथा नारायणः स्मृतः। ब्रह्मा शक्रो यमः कालश्चित्रश्चेत्यधिदेवता॥ अग्निर्दक्षिणतः सूर्याद्विं
नुरुत्तरतो रवेः। आप उत्तरतः सोमादुमा दक्षिणतस्तथा। भूमिः पश्चिमतो भौम स्कंदो दक्षि
णतः स्मृतः। विष्णुः प्राच्यां बुधात् स्थाप्यः पश्चान्नारायणः स्मृतः। इंद्रः पश्चाद्गुरोश्चैव ब्रह्मा स्था
प्योथ पूर्वतः। इंद्राणी पश्चिमे शुक्रात् प्राच्यामिंद्रस्तथैव च। प्रजापतिर्निरृतौ तु राहोः कालो ७

पराजितः। केतो राग्नेय्यां तु ब्रह्मा चित्रगुप्तस्तु नैरृते। दिक्पालेषु च दक्षिणं पूर्वादिक्रमे
ण स्थाप्याः॥ नवमोपराजितायां। पृथिवी पश्चिमायां दिशि। लोकपालाः सूर्यादुत्तरतः। शनि
श्चरादीशानकेतुं तो राग्नेये आदित्याद्वायव्ये गणपतिः। गणपतेरुत्तरतो दुर्गा गणपतेः पू
र्वतः क्षेत्रस्यपतिः। गणपतेर्निरृते वास्तोष्पतिः। दुर्गाया उत्तरतो मरुतः। ग्रहमंडलस्येशान
कोणे च दक्षिणे कृत्तिकादिनक्षत्राणां सप्तसप्तादेवता स्थाप्याः॥ इति दिशं। ततः आचार्योग्नि
कपीठादीशान्यां अकालप्रभृतं जलपूर्णं रुद्रकलशं स्थापयेत्। तद्विधिः। स्योना पृथिवी नवा
इत्यनेन भूप्रार्थना। आजिघ्र कलशं। षा। इत्यनेन कलशस्थापनं। भूर्भुवः स्वः इत्यनेन

कह्लाराणां।याओषधीःदूर्वाजाता॰वाओषधीप्रक्षेपः।आयुष्यंवर्चस्यं॰मों।इतिहिरण्यं।अश्वत्थेवो॰
षं॥इतिपल्लवप्रक्षेपः।वटाम्रजंबूप्लक्षोदुंबराणांचपल्लवाः।इदंतेपात्रं॰वाः।इतिताम्रपात्री
याःफलिनीर्याअफला॰मः।इतिनालिकेरश्रृंगादितांत्रोपरि।युवंवस्त्राणि॰ये।इतिवस्त्रवेष्ट
नं॥ततःआचार्यःफिरकलशोपरिब्रह्मविष्णुरुद्रान्स्थापयेत्।तत्ररुद्रजपःकर्त्तव्यः।ततोग्र
हादीनांप्रतिष्ठा॥संक्षेपपूजा॥अथग्रहादीनांस्थापनदेवनमंत्राः।आकृष्णेनाद्यायस्याग्निर्मूर्द्धा
द्बुध्यध्वंबृहस्पतेअतिस्रुकं।तअन्यच्छमग्निःकयानः।कर्तुंक्षएवंतिग्रहमंत्राः।अग्निंदूतमप्सुमे
स्योनापृथिवीदंविष्णुरिंद्रंश्रेष्ठानीशानीमासुप्रजापतेनत्वदेतआयंगौब्रह्मजज्ञानमितिदेवता ९

मंत्रा॥कद्रुद्रायगौरीर्मिमाययदक्रंदःसहस्रशीर्षाब्रह्मणस्पतेत्रातारमिंद्रंपरेयिवांसं
कायमानस्त्वंनश्चित्रइत्यधिदेवतामंत्राः।त्रातारमिंद्रंत्वंनोअग्नेयस्मिन्वृक्षेप्रतायद्धिरुद्र
मंवरुणानानियुद्भिर्वयंसोमतमीशाननमस्मेरुद्रास्योनापृथिवीतिदिक्पालमंत्राः।एंद्र
मानसिंब्रह्मणस्पतेपरेयिवांसंवायवायाहिवरुणस्याविततिलोकपालमंत्राः।गणानांत्वा
जातवेदामन्हित्रस्यपतिनावास्तोष्पतेप्रतिमरुतायस्यहिक्षयइतिगणपतिमंत्राः।अग्नि
र्षिप्रजापतेआप्यायस्वकद्रुद्रायादितिर्द्योर्बृहस्पतेअतिकालिकोनामोदीरतांनश्चोनोत्र
ग्निर्ज्जुनीतीनःसवितापश्चातादित्वष्टारंवायवायाहीशानीआगतमानामित्रोवरुणाग्ना
तारमिंद्रमपेहिमनसस्पतेसमुद्रज्येष्ठाविश्वेदेवासआगततत्सवितुर्वरेण्यमिदंविष्णुर्येन॰

सपत्नावरुणः आवितारीनो अज एकपादुत नो अहिर्बुध्न्यः पूषाण एषो उषापरेयिवांसमि
तिनक्षत्रदेवतामंत्राः ब्रह्मणस्पत इदं विष्णुः कद्रुद्रायेति ब्रह्मविष्णुरुद्रमंत्राः तदस्त्विति
प्रतिष्ठामंत्रः ॥ अथ संक्षेपपूजाविधिः ॥ आदित्यादिनवग्रहेभ्यः स्थापितदेवताभ्यः सहितेभ्य
इदमत्र चंदनादि ॥ अग्नितान्निघारणं । उदगुद्वासनं । पार्श्वप्रक्षालनं । प्रत्यन्निघारणं । सप्तदश
समिधो जुहुयात् । विष्णोर्दस्तोसि ॥ इति करास्रुवयोर्ग्रहणं । त्वमग्ने हिरण्यस्तूपोग्निर्जी
गती । त्वमग्ने प्रमतिः०न्या ॥ स्वाहा ॥ उत्तरतः पश्चार्धरिग्नेरारभ्याविच्छिन्नं दक्षिणान्तां जुहोति ।
यस्येमं हिरण्यगर्भ त्रिष्टुप् । यस्येमे हि०म ॥ स्वाहा ॥ दक्षिणपश्चार्धरिग्नेरारभ्याविच्छिन्न
मुत्तरान्तां जुहोति ॥ अग्नये स्वाहा उत्तरतः सोमाय स्वाहा दक्षिणतः मध्ये न्याहुतयः आदित्या ९

दिनवग्रहाणां आकृष्णेनेत्यादिभिर्मंत्रैः अर्कादिसमिद्धोमः स्वाहाकारांतहोममंत्राणां
समिदाधानं ॥ अर्कः पलाशः खदिरोपामार्गोथ पिप्पलः उदुंबरः शमी दूर्वा कुशाश्च समि
धः क्रमात् ॥ एकैकस्यात्र अष्टशतमष्टाविंशतिरेव वा होतव्या मधुसर्पिभ्यां दध्ना क्षीरेण वा
युता ॥ इति याज्ञवल्क्यः ॥ उक्तमंत्रैः प्रतिमंत्रं एकैकेन स्रुवेणाज्यहोमः ॥ एवं स्रुवं स्रुवि मु
क्त्वा अवदानद्वयं मेक्षणेन स्रुवि मुक्त्वा पुनः स्रुवं आनिघारद्वयं करोति । आकृष्णेन०पश्यन् स्वा
हा ॥ वउगृहीतं कवा ॥ आप्यायस्व०थे स्वाहा ॥ अग्निर्मूर्धा०ति ॥ स्वाहा ॥ उद्बुध्यध्वं०वः स्वा०
बृहस्पते०त्रे ॥ स्वाहा ॥ शुक्रं ते अ०स्तु ॥ स्वाहा ॥ शमग्निर०धा ॥ स्वाहा ॥ कयान०ता ॥ स्वाहा
केतुं कृण्वन्न०र्या ॥ स्वाहा ॥ आकृष्णेनेत्यादिभिर्मंत्रैः घृताक्ततिलयवहोमः ॥ आकृतिः २० ॥

द्राक्षेक्षुपूगनारिंगंजंबीरंबीजपूरकं॥ उत्ततीनालिकेरंचदाडिमानियथाक्रमं॥ आब्रह्मने
त्यादिप्रत्यृचं॥०॥ [redacted] त्रातारमिंद्रमित्यादि॥ त्र्यंबकं० रुद्रजप
स्यदशांशहोमः॥ अस्यामातसुमतिं० हविः स्वाहा॥ आहुतिः॥१३॥ अथस्थापितदेवताहो
मः॥ वदादयस्त्र्यंबकश्चलक्ष्मीश्चाथसरस्वती। मरुत्पर्जन्यवसवोविश्वेदेवाअश्विनौसविता
व्याहृतयः॥ अग्निमीलेइषेत्वाअग्नआयाहिशन्नोदेवीरितिवदादिमंत्राः॥ त्र्यंबकंसक्तुमि
वपावकानोमरुतोविलुपर्जन्याययेनः सपत्नाउमासएषोउषानस्सवितुर्व्याहृतयश्चतस्रः
अस्थापितस्य॥ त्र्यंबकं०त्स्वाहा॥ घृताक्तगुग्गुलहोमः। सक्तुमिव०विःस्वाहा॥ पयःशर्क
राइर्वाशतपत्रमिश्रान्दुग्धालितंदुलान्जुहुयात्॥ पावकानइत्यादिनातिलंयवान्॥ इतिअ १०

स्थापितदेवताहोमः॥ ग्रहपूजा॥ अद्यश्री० आदित्यादिनवग्रहाणांसानुकूलार्थंआदि
त्यादिनवग्रहाणांअस्थापितदेवतासहितानांपूजनमहंकरिष्ये॥ भास्करांगारकौरक्तौ
श्वेतौशुक्रनिशाकरौ। पीतौबुधगुरूचैवशेषाःकृष्णग्रहाःस्मृताः॥ यथावर्णंप्रदेयानि
वासांसिकुसुमानिगुडोदनंपायसंचहविष्यंक्षीरषाष्टिकं॥ दध्योदनंहविश्चूर्णंमांसंचि
त्रान्नमेवच॥ इतियाज्ञवल्क्यः॥ रक्तंश्वेतंक्रमाद्दद्यात्करवीरंकुसुंभकं। चंपकंशतपत्रंच
जातीपुष्पंतथैवच॥ शमीपत्रंतथागस्त्यपुष्पंबिल्वविचित्रकं॥ रक्तचंदनमादित्यायश्री
खंडंसोमायकुंकुममंगारकाय। गोरोचनंबुधबृहस्पतिभ्यां। श्रीखंडंशुक्राय। कस्तूरिकारा

निराकृत्य॥ विचित्रं वदनं केतुभ्यः॥ कुंदरादि॥ रक्तकणवीरमादित्याय। श्वेतकणवीर
सोमाय॥ कुसुंभमंगारकाय। चंपकं बुधाय। शतपत्रं बृहस्पतये। जातीपुष्पं शुक्राय। श
मीपत्रं शनिश्चराय॥ अगस्त्यपुष्पं राहवे। विचित्रपुष्पं केतुभ्यः॥ कुंदरादिधूपः सर्वेषां॥
दीपः॥ गुडोदनमादित्याय। घृतपायसं सोमाय। हविष्यमंगारकाय। क्षीरषष्टिकं बुधाय। द
ध्योदनं बृहस्पतये। मोदकं शुक्राय। कृशरं शनिश्चराय। मांसमोदनसंयुक्तं राहवे। वि
चित्रान्नं केतवे। इति पूजाविधिः॥ आदित्यादिनवग्रहेभ्यः इदमन्नं। अधिदेवताभ्यः
इदमन्नं। चंदनादिनैवेद्यांतं॥ अर्घः॥ आदित्याद्या ग्रहाः सर्वपीठे ये च प्रतिष्ठिताः। तेभ्य

स्तु मया दत्तं इममर्घं नमो नमः॥ नागवल्लीदलं युक्तं पूगीफलसमन्वितं। कर्पूरेण स
मायुक्तं तांबूलं प्रतिगृह्यतां॥ अत्र चंदन० नि इदं नैवेद्यं ता०थं स्थापितदेवतासहितानां
नवग्रहाणां यथाविभागं निवेद्यं च स्वाहा॥ नमो ब्रह्मणे रुक्। ये देवासो रुक्। विश्वेन
च्छेदुं। इदमारात्रिकं नवग्रहेभ्यः स्थापितदेवतासहितेभ्यः॥ पुनः पूजा॥ आरात्रिकवंदनं
नमस्कारः॥ आदित्यादिभ्यो नमः। आयुर्विद्यां धनं दत्त यशः शौर्यं च पुष्कलं। पुत्रान्दत्त सु
र्वं दत्त सर्वान्कामान्प्रयच्छ मे॥ इति प्रार्थना। रक्तचंदनादिचंदनैः रक्तकणवीरादिपुष्पैः
कुंदरादिधूपैः घृतादिदीपैः गुडोदनादिनैवेद्यैः कर्पूरादिआरात्रिकैः अनया यथा

ऌतश्च जनयान्भगवंतः आदित्याद्याः स्थाः० सवितारः प्रीयंतां। वह्निरुज्जा। आदित्येकपिलो०
क्तनाशनः॥ इति वह्निपुष्पधृकेपः। बलिदानं। पूर्वस्यां। त्रातारमिंद्र० इंद्र। इंद्राय बलिंन
मः। इंद्रानुचरेभ्यो बलिं नमः। त्वंनो अग्ने० ते। अग्नये नमः। अग्न्यनु०मः। यस्मिन्वृक्षे० ति। यमा
य नमः। यमानु०मः। एतायति०तां। निर्ऋत्यै०मः। निर्ऋत्यनु०मः। उदुत्तमं वरु०म। वरुणाय
नमः। वरुणानुच०मः। आनो नियुद्भिः० नः। वायवे नमः। वाय्वनुचरेभ्यो नमः। वयं सोम० दि
सोमाय नमः। सोमानु०मः। तमीशानं० ईशानाय०मः। ईशानानु०मः। अस्मे रुद्रा० रुद्राय०
रुद्रानु०मः। स्योना०थ्यः॥ पृथिव्यै नमः। पृथिव्यनु०मः॥ इति बलिदानं। अथ पूर्णाहुतिः॥ १२

स्रुव वसुधायं स्रुवि मुच्चा पत्रं शृंगं नालिकेरं वश्रीखंडं कर्पूरं कस्तूरिकां नूतमवस्त्रं वा
मुच्चा। समुद्रादूर्मि० र्मिं। स्वाहा॥ धारया घृतहोमः॥ ततः स्विष्टकृत्। एकः स्रुवः। अवदा
नमेकं उपरि स्रुव द्वयं। अभिघारोन॥ ॐ अग्नये स्विष्टकृते स्वाहा॥ सप्तकं। भूः स्वाहा। भु
वः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वः स्वाहा। अयाश्चाग्नेस्यनभिशस्तिश्च सत्यमित्वमयाअ
सि। अयासा मनसा कृतायासन्हव्यमूहिषेअयानोधेहि भेषजं स्वाहा॥ प्रजापतये
स्वाहा॥ सव्ये पाणौ यत्कुशास्तान् दक्षिणेनाग्रे संगृह्य मूले सव्येन। स्रुचयं मध्यं स्रु
वमूलमाज्यस्थाल्यां अग्नेर्वासासीति। निस्रः समिधोऽनुकुर्यात्। यथोक्तं पर्युक्षणं इद

मापश्चिन्द्वेन मार्जनं॥ पवित्रमोक्षयित्वा॥ बर्हिर्होमि॥ होमसंकल्पः॥ पुण्या॰ स्तुवि
वा॰ सो॰ अ॰ ह॰ दी॰ शां॰ पु॰ त॰ ह॰ अ॰ आ॰ दि॰ अस्मिन्नवग्रहशांतिककर्मणि य
द्यद्द्रव्यं यावद्यावत्संख्याकं येन येन मंत्रेण कृतं तत्तद्द्रव्यं तावत्तावत्संख्याकं तेन तेन मं
त्रेण कृतं तस्यै तस्यै देवतायै प्रीयतां॥ ते देवाः सुप्रीतिदाः शांतिदाः पुष्टिदाः वरदाः
भवेयुः॥ अस्य नवग्रहशांतिककर्मणः प्रतिष्ठासिद्ध्यर्थं सर्वानिष्ट॰ आदित्यादिनव
ग्रहाणां प्रीत्यर्थं धेन्वाद्युक्तदक्षिणां निष्क्रय यथा॰ द्रव्यं आचार्यप्रमुखऋत्विग्जापके
भ्यो ह संप्रददे॥ यो यस्य वि॰ तां॥ अस्य नवग्रहशांतिकर्मणो यन्न्यूनातिरिक्तं परिह १२

णार्थं यथोत्साहां भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यो॰ यो यस्य॰ तां दक्षिणाः पां वि
त्यादि॥ स्वस्ति न वं तो ब्रुवंतु॥ नवग्रहशांतिककर्मणो यन्न्यूनातिरिक्तं॰ स्तु॥ अभिषेकः
पूर्वकलशात् ताम्रपात्रे जलमुद्धृत्य पूर्वाभिमुखस सस्वजनस्य यजमानस्याद्यनुक्रमेण
शिरसि कार्यः॥ तत्र मंत्राः॥ ॐ ब्रयोयं ऋक॰१ आपद्धा ऋक॰१ इमं मे गंगे ऋ॰१ समुद्रज्येष्ठा
ऋक॰४ सहस्राक्षं शतधारं ऋषिभिः पावनं कृतं॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते॥
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः॥ भगमिंद्रश्च वायुश्च भगं सप्तऋषयो ददुः॥ यत्ते
केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा॥ अष्ट

ताभिषेकोस्तु॥ मांगल्यं कुंकुमेन साक्षतेन॥ ग्रहाशिषः शान्त्यादि फलानि च॥ वृक्षानु
क्रमेण तेषां हस्ते दद्यात्॥ अज्ञाय यजमानाय वा नालिकेरं॥ आज्याक्तस्रुवेण ग्रहहोम
भस्म गृहीत्वा तेषां ललाटे कुंकुमवन्मांगल्यं॥ वर्धापनं ग्रहादीनां तेषां च आत्रीवदाः॥ आ
चमनं ददाति॥ प्रणीताविमोकः॥ ब्रह्मणे पूर्णपात्रं ग्रहशांतिकर्मणः सम्पूर्णार्थं इदं पूर्ण
पात्रं सहिरण्यं ब्राह्मण तुभ्यमहं संप्रददे॥ ब्रह्मोत्सर्जनं॥ कर्मापवर्गे ब्राह्मणभोजनं॥ अ
स्य नवग्रहशांतिकर्मणः सम्पूर्णार्थं कर्मांगदेवतानां प्रीत्यर्थं न्यूनातिरिक्तं परिहरणार्थं यथा
संपन्नेनान्नेन तृप्तिपर्यंतं भोजनं ब्राह्मणमेकं अहं तर्पयिष्ये भगवत्यः कर्मांगदेवताः प्री १४

यंतां॥ शांनः पंचो नाशांतिः॥ शांनइंद्राग्नी वर्ग ३ त्रयो विजपेत्॥ अस्य नवग्रहशांतिक
र्मणो यन्न्यूनातिरिक्तं०स्तु॥ गृहे वृद्धि० न०स्तु॥ ग्रहादीनां विसर्जनं॥ इति ग्रहशांतिः॥
॥ अथ विनायकी शांतिः॥ ग्रहसहिता॥ अंगुललक्षणं॥ खात अंगुल १५ यव०॥ चतु
र्थांशोन॥ मेखला प्रथमा अंगुल २ पृथुः द्वितीया अंगुल ४ यव १ प्ररूढ उच्चः॥ द्वितीया अंगु
ल ३ यव०॥ उच्चः॥ तृतीया अंगुल २ यव०॥ उच्चैः॥ अंगुल १२ दीर्घ योनिः॥ मध्ये अष्टांगुला
पृथुः॥ अंगुल ३ कुंडमध्यखातप्रविष्टा॥ अंगुल १ मात्रः कंठः कुंडोष्ठायस्य एवं कारः॥
खात अंगुल १५ यव ३॥ मेखला प्रथमा अंगुल ४ यव १ मे० द्वि० अंगुल ३ यव ३ तृतीया अं

गुल२यव१॥ग्रहासनअंगुल२४चतुरस्रअंगुल१२उच्छ्राय॥गणेशांबिकयोः पीठे अंगुल१२
समचतुरस्र उच्छ्रायोपि अंगुल१२॥ग्रहपीठं ग्रहासनमेव॥होमकुंडादुत्तरस्यां दिशि
ग्रहासनं॥ईशान्यां ग्रहपीठं॥पूर्वस्यां गणेशांबिकयोः पीठे गणेशमूर्तिस्थापनं उत्तर
स्यां अंबिकामूर्तिस्थापनं॥ ॥अथ उपहाराः॥गणेशांबिकयोः मूर्तिः सौवर्णमयी॥का
पडां ४ रक्त अथवा पीत अथवा श्वेत अहत वस्त्र ग्रहपीठे स्थापनार्थं॥जुली मुं २ रूइ कल
शार्थं कुंभ ४ अकालकुध्नकलशारुइ स्य१ आवला ५ मुद्रापन ५ जुलीया ४ कुंभार्थं पंच
पल्लव॥सुगंधिद्रव्यं॥प्रियंगु॥नालिकेर॥वालो॥अगर॥गोरोचन॥चंदन॥मृत्तिका॥तीर्थोदि १५

कं॥सूर्प २ सूर्पे पिटार॥करडा पवालु १ तंडुलाः पवालु १ कलमुष्टि १ कूरशेर १॥गोधूमनि
र्मितमत्स्य॥पक्वापक्व॥कावां २ पाकां २ मांसस्थाने माषान्नसेर १॥नानाविधपुष्प॥नानावि
धसुगंध॥सुरात्रिविधा॥गौडी॥पैष्टी॥माध्वी॥मूलकपर्णी ३ दूर्वा ३ सूप ३ ईंडरां २ करबोसे
वोरी १ पायसशेर १ वाली लोटा ३ मोदक ३ रक्तान्न द्रव्य मिश्री पर्णी १ पीठ १ पंचवर्णस्वस्तिकक
र्णाः॥श्वेत रक्त तंडुलाः॥अडद॥नीला मुग॥पीली दालि॥वस्त्र २ यजमानार्थ॥वस्त्रयुग्म दा
नार्थ॥सर्षप तेल॥स्कंव उदंबरनो॥वरुस्थाली २ नालिकेर १० तिल॥यव॥अल्पतर॥गोलसेर १
चोखा मां णां ४ शाकेस्तु० अर्कपालाश० द्रव दधि मधु दुग्ध साकर॥नवग्रहपात्री॥नवग्रहधू

पाकं कुंकुमसर्षपा। कल्कसाज्या। घृत्री। सूक्ष्मकेड सुगंधद्रव्यसहिता। मूगा॥ ॥इति उपचाराः॥ म
स्थंडिले विघ्नराजस्य गौर्यश्च स्थापनं ततः। वरणं ब्राह्मणानां च ततो नशसनक्रिया।
स्थापकेन कलशानां च तत्सुसुशापनादिकं। कुशकंडीवरुपाकांतालघुइज्याद्वयोरपि। श्रि
तात्रिघारणाद्याज्यभागांता च कुशकंडिका। नशमनोपविष्टस्य कल्कोनाद्वर्तनं ततः। गंधै
र्हृद्भिविलेपश्च दक्षिणास्वस्तिवाचनं। कलशैः स्नपनं तस्य तैलहोमश्च मस्तके। यजमाने
क्ष्यास्नानं च रोराकृतयश्च षट्। विनायकांबिकाइज्यां प्रणामोऽर्घस्तथांजलिः। संकल्प
श्चैव इज्याया उपस्थानं पृथक्पृथक्। कुशकंडी स्विष्टकृत्पूर्वयाव ब्रह्मविसर्जनात्। होमस्य १६

दक्षिणादीनां कल्पना मंगलक्रिया। बलिदानं च रोःशेषाच्च वरेश्वर्पमाचनं॥ ततो वरणं॥
आचार्य१ स्वस्तिक४ ब्रह्मणां२ जापका। यजमानउदङ्मुखः पूर्वाभिमुखानां वरणं कुर्यात्॥
तत्र अद्येत्यादि विनायकोपसर्गनिवृत्त्यर्थं सग्रहां विनायकीशांतिकर्मणि कृष्यैद्रद्रपूर्तेश्च वा
यणितत्रेपाद्यं इत्यादि स्वस्तिवाचकएतत्रेपाद्यं। ऋत्विकएंजापकएंद्यं। ततः कुंडायेच
रणं आढं॥ आचमनादि प्रयोगं पठित्वा आचार्यप्रमुखस्वस्तिवाचकऋत्विग्जापकानां वरणम
हं करिष्ये। अमुकसगोत्र अमुकशर्मा नित्वस्त्रयुग्मधेन्वाद्य एतत्स्थालीपाकद्रव्येनाहं यच्च्ये॥
तत्र वा मा चार्येत्वृणे। युष्मान् स्वस्तिवाचकऋत्विग्जापकान् वृणे। इत्यादि। अथादत्तं अ। स्व

स्तिवाचकरुत्विक्ः इत्यादि उत्तरे कर्मणि अविघ्नमस्तु ॥ इत्थं तं सर्वत्र स्वस्तिवाचकब्राह्मो
धिकः ॥ मांगल्यं आशीर्वदाख्य ॥ अस्य यागस्य कर्तव्यं कामेति द्विधिक्षर्वकं ॥ ततो ग्रहास
ने रक्तनासितरक्तकृष्णनीलपीताख्यपंचवर्णस्वस्तिके प्राग्ग्री वप्राग्ग्रीवमुत्तरलोमं रक्तमा
नडुहं चर्म आस्तीर्य तदुपरि श्रीपर्णी पीठं वस्त्रं स्थापयेत् ॥ पूर्वादिदिक्षु क्रमेण चतुरः कलशा
न् जलपूर्णान् उत्कलत्रणान् स्थापयेत् ॥ तत्र मुद्रापनादिकं न्यसेत् ॥ अश्वस्थानाद्गजस्था
द्वल्मीकात्संगमाद्ध्रदात् ॥ मृत्तिकां रोचनां गंधमगुरुं गुग्गुलं च प्रियंगु वालां नालिकेर इत्यादिक
लशेषु निक्षिपेत् ॥ ततः आचमनं स्वस्त्ययनमित्यादि तस्य विद्युर्व इत्थं तं कृत्वा ह्रविग्रद्दिणां ॥ १९

मितायमन्मितायशालायकटंकटाय कूष्मांडाय राजपुत्राय जुष्टं गृह्णामि ॥ इव तुर्थं हुक्षीं
जुष्टमासादयामि ॥ आदित्याय केतुभ्यो जुष्टं गृह्णामि ॥ इव तुर्थं हुक्षीं ॥ जुष्टमासादयामि ॥
आदित्यादिकेतुपर्यंतेभ्यो जुष्टमासादयामि ॥ इव तुर्थं हुक्षीं ॥ मिताय जु मासादयामि ॥ प्रो
क्षामि ॥ त्रिःप्रक्षालनं तु नयतः ॥ अधिश्रयणं च क्रमेण उदकसंस्थं ॥ दक्षिणतो गणेशपीठे
वस्त्रमास्तीर्य तदुपरि अष्टदलेनागवल्लीदलोपरि गणेशमूर्तिस्थापनं ॥ एवमंबिकायाः षट्
कोणे तदुपरि तयोः संक्षेपपूजा ॥ ततो ग्रहादीनां स्थापनं ॥ रुद्रकलशस्थापनं ॥ तत्र ब्रह्मविष्णुरु
द्रस्थापनं ॥ सार्वषां प्रतिष्ठापूजा संक्षेपेण ॥ रुद्रकलशे रुद्रजपः ॥ अग्निनिधारणाद्याज्यनाशं

तं कृत्वा यजमानशाले कुंकुमं विकीर्य कृत्वा वस्त्रार्पणं। नूतनासने आदौ दक्षिणं पादं निधा
य यजमान उपविशति॥ ब्राह्मणं पुण्याहमिति कृत्वा एष्यु। ततः आचार्यः साज्येन गोध
सर्षपकल्केनाभ्यक्तमंगुष्ठाभ्यां पादयोर्जान्वोर्जानुस्थितयोः करयोः स्कंधयोर्ललाटे च यज
क्तिवङ्कः कृत्वा। ततः चतस्रः सुवासिन्यो ष्टौ वा एवमेवाभ्यंजयति। ताभ्यो वस्त्रयुग्मानि मु
कुटानू स्रजश्च दद्यात्। ततः कल्कोनोद्धर्तनं। गंधैर्हरिद्रा विलेपश्च॥ मांगल्यकरणं वर्षप्र
नं। स्वस्तिवाचनं। पुण्याहं दीर्घमा० इत्यादि। स्वस्तिवाचनकर्मणः प्रतिष्ठासिद्ध्यर्थं हस्ते
पुं० सुवर्णं ति नव वित्यं तं कृत्वा॥ अस्य नूतनासनोपविष्टस्य मम स्वस्तिवाचनकर्मणः प्रति १८

ष्ठासिद्ध्यर्थं श्रीगणेशाश्रीत्यर्थं विनायकोपसर्गनिवृत्यर्थं हिरण्य०द्यं अथवा बार्हस्पत्या
नि वस्त्रयुग्मानि स्वस्तिवाचकब्राह्मणेभ्यो ऽहं संप्रददे। जलं जले॥ यो यस्य विनाग०तां त
था नश० ममश्री अंबिका प्रीत्यर्थं दत्तानि बार्हस्पत्यानि वस्त्रयुग्मानि विचित्राणि मुकुट स्र
क् सहितानि चतस्रभ्यः सौवासिनीभ्यः अहं संप्रददे। दक्षिणा। पां वित्यादि स्वस्ति नर्वतां ब्रु
वं चेति ब्राह्मण हस्ते पु अस्य नश० मम स्वस्तिवाचनकर्मणो यन्न्यूनातिरिक्तं० स्नु० उं०
ततः श्वेर्वे पंचवर्में कलत्रमादाय। आचार्य नक्काय गृहीत्वा पुण्याहवाचनं कुर्यात्॥ तदेव लिख्य
ते॥ ॥ संपूज्य गंधमाल्याद्यैर्ब्राह्मणान् स्वस्तिवाचयेत्। धर्मकर्मणि मांगल्ये संग्रामाद्भुत

दर्शाने। पुण्याहवाचनं देवब्राह्मणस्य विधीयते। एतदेव निरोंकारं कुर्यात्क्षत्रियवै
श्ययोः। स्थापयेद्व्रणं कुंभं पंचपल्लवसंयुतं। पंचरत्नसमायुक्तं वस्त्रयुग्मेन वेष्टितं। संगृह्य पा
णिना चार्यो वाचयेत्स्वस्तिवाचनं॥ अवनिकृतजानुमंडलं कमलमुकुलसदृशमंजलिं शि
रस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा दीर्घायुषो नागा नद्यो गिरयः
त्रीणि विष्णुपदानि च तेन आयुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु। शिवा आपः संतु। सौमन
स्यमस्तु। अक्षतं चारिष्टं चास्तु। गंधाः पांतु। मांगल्यं चास्तु। पुष्पाणि पांतु॥ सुश्रियमस्तु। अक्ष
ताः पांतु। आयुष्यमस्तु। तांबूलानि पांतु। ऐश्वर्यमस्तु॥ दक्षिणाः पांतु। आरोग्यमस्तु। दीर्घमायु १९

रस्तु॥ शांतिरस्तु। पुष्टिरस्तु॥ तुष्टिरस्तु॥ श्रीर्यशो विद्या विनियोवृ वित्तं बहुपुत्रं बहुधनं
चायुष्यं चास्तु॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते। प्रवर्तं
तमहमोंकारमादिं कृत्वा ऋग्यजुः सामाथर्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिर
नुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। वाच्यतां॥ ऽविणोदाऽविणो दारुक॥ १ सविता पश्चातात्
ऽक॥ नवो नवो भवति जायमानोऽक॥ २ उच्चा दिवि दक्षिणावंतो ऽक॥ ३ इत्येतान्व पुण्या
हं ब्रूयात्॥ व्रतनियमतपस्स्वाध्यायक्रतुदमशमदानविशिष्टानां सर्वेषां ब्राह्मणानां म
नः समाधीयतां। समाहितमनसस्मः। प्रसीदंतु भवंतः। प्रसन्नास्मः॥ शांतिरस्तु। पुष्टिरस्तु॥

तुष्टिरस्तु। वृद्धिरस्तु। अविघ्नमस्तु। आयुष्यमस्तु। आरोग्यमस्तु॥ शिवं कर्मास्तु। कर्मस
मृद्धिरस्तु। पुत्रसमृद्धिरस्तु। वेदसमृद्धिरस्तु। शास्त्रसमृद्धिरस्तु। धनधान्यसमृद्धिरस्तु। इ
ष्टसंपदस्तु। अनिष्टनिरसनमस्तु। यत्पापं तत्प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु। द्विपदच
तुष्पदेभ्यः शांतिरस्तु। उत्तरे कर्मण्यविघ्नमस्तु। उत्तरोत्तरमहरहरभिवृद्धिरस्तु। उत्तरोत्त
राः क्रियाः शुभाः शोभनाः संपद्यंतां। तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्री
यंतां। तिथिकरणे मुहूर्ते नक्षत्रे सग्रहे [illegible] प्रीयेतां। दुर्गापांचाल्यौ प्रीयेतां। अग्नि
पुरोगा विश्वेदेवाः प्रीयंतां। इंद्रपुरोगा मरुद्गणाः प्रीयंतां। वसिष्ठपुरोगा ऋषिगणाः २०

वेदा॰ २

प्रीयंतां। अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां। महेश्वरपुरोगा उमा मातरः प्रीयंतां। ब्रह्म
पुरोगा [illegible] प्रीयंतां। विष्णुपुरोगा सर्वे देवाः प्रीयंतां। ब्रह्म च ब्राह्मणाश्च प्रीयंतां।
श्रीसरस्वत्यौ प्रीयेतां। श्रद्धामेधे प्रीयेतां। भगवती कात्यायनी प्रीयतां। भगवती माहे
श्वरी प्रीयतां। भगवती ऋद्धिकरी प्रीयतां। भगवती वृद्धिकरी प्रीयतां। भगवती तुष्टिकरी
प्रीयतां। भगवती पुष्टिकरी प्रीयतां। भगवंतौ विघ्नविनायकौ प्रीयेतां। सर्वाः कुलदेव
ताः प्रीयंतां। सर्वा ग्रामदेवताः प्रीयंतां। हताश्च ब्रह्मद्विषः। हताश्च परिपंथिनः। हताश्च
विघ्नकराः। शत्रवः पराभवं यांतु। शाम्यंतु घोराणि। शाम्यंतु पापानि। शाम्यंत्वीतयः।

शुना निवर्द्धंतां। शिवा आपः संतु। शिवा ऋतवः संतु। शिवा वनस्पतयः संतु। शिवा अ
ग्नयः संतु। शिवा आहुतयः संतु। अहोरात्रे शिवे स्यातां। निकामे निकामे नः पर्जन्यो व
र्षतु फलवत्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पताम्। शुक्रांगारबुधबृहस्पति
शनिश्चरराहुकेतुसोमादित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां। भगवान् स्वामी नारायणः प्री
यतां। भगवान् स्वामी पर्जन्यः प्रीयतां। भगवान् स्वामी महासेनः प्रीयतां। अथ पुण्याहका
लं वाचयिष्ये। वाच्यतां। ब्राह्मं पुण्यं महर्यच्च सृष्ट्युत्पादनकारकं। वेदवृक्षोद्भवं नित्यं
तत्पुण्याहं ब्रुवंतु नः। भो ब्राह्मणाः अस्य यजमानस्य गृहे पुण्याहं भवंतो ब्रुवंतु ३ पुण्य २१

हं ३ उद्गातेव शकुनसाम गायसि ऋक् १ पुनंतु मा देवजनाः ऋक् १ पुनानः सोमा ऋक् १ पु
नंतु मां देवजनाः ऋक् १ पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतं। ऋषिभिः सिद्धगंधर्वै
स्तत्कल्याणं ब्रुवंतु नः। भो ब्राह्मणाः अस्य यजमानस्य गृहे कल्याणं भवंतो ब्रुवंतु ३ कल्या
णं ३ अपां साममस्त ऋक् १ यथेमां वाचं कल्याणीं ऋक् १ कयानश्चित्रा ऋक् १ सागरस्य तु
या ऋद्धिर्महालक्ष्म्यादिभिः कृता। संपूर्णा सुप्रभावा सा तां ऋद्धिं ब्रुवंतु नः। भो ब्राह्मणाः
अस्य यजमानस्य गृहे ऋद्धिं भवंतो ब्रुवंतु ३। ऋध्यतां ३ ऋध्याम स्तोमैः ऋक् १ सत्रस्य ऋद्धि ३ अ
हो वा ३ अगन्म ज्योतिः। मा म १ स्वस्ति यत्रिविनाशाख्या पुण्यकल्याणवृद्धिदा। विनाय

कप्रिया नित्यं तां स्वस्तिं ब्रुवंतु नः ॥ अद्यो ब्राह्मणाः अस्य यजमानस्य गृहे स्वस्तिं भवंतो ब्रु
वंतु ॥ ॐ स्वस्ति ३ स्वस्ति रिद्धि प्रपथे श्रेष्ठो रेक्णः ॥ स्वस्ति न इंद्रो वृद्धश्रवाः ॥ त्रातारमिंद्रम
वितारमिंद्रं साम ॥ आपः इद्वा उ भेषजीः ॥ अमृताभिषेको अस्तु ॥ ॥ इति स्वस्तिवाचनं
॥ मंगलम् ॥ ततः पूर्वकलशमादाय सहस्राक्षं शतधारं ऋषिभिः पावनं कृतं । तेन त्वामभि
षिंचामि पावमान्यः पुनंतु ते । इत्युक्त्वा आम्रपत्रेण द्विरभिषिच्य यजमानस्य शिरसि श
वक्तिसुखस्तिष्ठन्तु तत्र राशिमुखो वा आचार्यः निनयेत् । ततो दक्षिणं कलशमादाय । ॐ
तद्वरुणो राजा । ॐ सूर्यो बृहस्पतिः । ॐ गामिंद्रश्च वायुश्च ॐ सप्त ऋषयो दक्षु ॥ इति पूर्व २२

वत् निनयेत् ॥ ततः पश्चिमकलशमादाय । यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि । ल
लाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु सर्वदा ॥ इत्येवं निनयेत् । ततो व्याकृत्य उत्तरं कलशमा
दाय । त्रीन्मंत्रानुच्चार्य पूर्ववत् निनयेत् । ततः वामहस्तेन कुशानादाय तस्य शिरसि धार
यन् सार्षपं तैलं उदुंबरस्रुवेण कुशाग्रांतर्हितशिरसि वक्ष्यमाणमंत्रैर्जुहुयात् । य
जमानस्याग्नौ जुहुयात् ॥ इदं मिताय न मम इत्येवं सर्वेषु ॥ ॐ मिताय स्वाहा ॥ ॐ संमिताय स्वा
हा । शालाय स्वाहा । कटंकटाय स्वाहा । कूष्मांडाय स्वाहा । राजपुत्राय स्वाहा ॥ यजमानस्य
अंगस्नानं । ततश्चतुर्गृहीतं आज्यं मिताय स्वाहेत्यादिभिः षड्भिर्मंत्रैः षड्भिर्नाय कबर्वर्जि ·

तीर्जुहुयात्। ततो ग्रहाणां समिदाज्यचर्वादिहोमः॥ ततो विनायकांबिकापूजा॥ तत्प्रकारः।
तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दंती प्रचोदयात्॥ अनेन मंत्रेण गणेशस्य षो
डशोपचारपूजा॥ कृताकृततंडुलादिकपदार्थयुक्तं शूर्पस्थं नैवेद्यं सकुसुमोदकेन अर्घं
नालिकेरार्घश्च॥ तत्पुरुषाय० दंतिन एव। ततः दूर्वासर्षपपुष्पांजलिः॥ पुण्याहं दी० स्वस्ति शांति
र्भवतु॥ अस्य गणेशपूजनकर्मणः समृद्ध्यर्थं श्रीविनायकप्रीत्यर्थं विनायकोपसर्गनिवृ
त्त्यर्थं यथासंपन्नेनान्नेन तृप्तिपर्यंतं भोजनेन शत ब्राह्मणान् अहं तर्पयिष्ये। भगवा
न् श्रीविनायकः प्रीयतां॥ अशक्तौ यथासंख्या कार्या॥ यथाकृतां पूजां श्रीगणेशाय तस्मा २३

दा॥ अनया यथाकृतपूजया भगवान् श्रीगणेशः प्रीयतां॥ उपस्थानं॥ रूपं देहि यशो दे
हि भाग्यं भगवन्देहि मे। पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ एवमंबिकापूजा॥
सुभगायै विद्महे काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्॥ इति मंत्रः॥ भगं भगव
ति देहि मे इत्युपस्थानविशेषः। ततो ग्रामवदानमुद्धृत्य पात्रांतरे मुक्त्वा ततः स्कंदविन्यस्य
श्रावोक्तधर्मेणाग्निं स्विष्टकृतं जुहुयात्। सप्तकं प्रजापतये स्वाहेति कृत्वा सव्ये पाणौ यान्
कुशान् स्कंधयं० अग्नेर्वासि सीति॥ तिस्र आस मि० इत्यादि बर्हिर्होमः॥ पुण्या० स्वस्ति शांतिर्भव
तु॥ अस्मिन् सग्रहविनायकशांतिकर्मणि यद्यदस्तु॥ सग्रहविनायकशांतिकर्म[illegible]वति

ञामिद्ध्यर्थं वस्त्रयुग्मधेन्वाद्युक्तदक्षिणां निष्क्रय यथा दास्यमानं द्रव्यं आचार्यप्रमुखऋत्वि
ग्भ्यः पाककर्त्रोर्दक्षसंप्रददे। योयं०तां॥ भूयसीं संकल्प्य॥ दक्षिणाःपांचित्यादि। ब्रुवंतु। अस्य स
म्य०कर्मणो०स्तु। विनायकोपसर्गः निवृत्तिरस्तु॥ ततो निषेकः॥ मांगल्यं। विनायकचरोः शे
षात् नष्टासनं परितः बलिदानं। इंद्रायनमः। इंद्रानुचरेभ्यो नमः। इत्यादिक्रमात् सानुचरेभ्यो
दिक्पालेभ्यः। ततश्चचरेः शूर्पमोचनं। चरुचरे भूमिं शोधयित्वा कुंकुमेन प्रोक्ष्य कृष्णानास्तीर्य।
चत्वराधिष्ठात्रीदेवतानां अत्र वंदनादि पूजां कृत्वा शूर्पस्थं बलिं दद्यात्। तस्य मंत्राः। बलिं
गृह्णंत्विमं देवा आदित्या वसवस्तथा। मरुतो थाश्विनौ रुद्राः सुपर्णाः पन्नगाः ग्रहाः। असु २४

राः यातुधानाश्च पिशाचा मातरो नगाः। न्रा किन्न्यो यक्षा वेताला योगिन्यः पूतनाः शिवाः।
जृंभकाः सिद्धगंधर्वमाला विद्याधरा नगाः। दिक्पाला लोकपालाश्च ये च विघ्नविनाय
काः। जगतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नं मा च मे पापं मा संतु परिपंथिनः। सौ
म्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः। इदं वेणवशूर्पस्थं निवेद्यं सतालताद्युपहारं
जातं आदित्यादिलिंगोक्तदेवताभ्यः। इति श्रुत्वा निर्मुखः सन् पूर्वकोणे शूर्पं मुक्त्वा
अतिस्थजन् दक्षिणां तिक्रम्य नमस्कृत्य गच्छेत्। ततो मंडपद्वार्यां गत्वा युगमुशलादिना
स्त्रियो मंगलाचारं कुर्वंति केचित्तत्र निषेकं मांगल्यं च। चरुचरे शूर्पं मुक्त्वा गृहमागतस्य

पश्चादेव कुर्यान्निःपूर्वमित्याहुः। पाठक्रमादर्थक्रमो बलीयानिति न्यायात्। ततः आचा
र्यः प्रणीतां विमोकादिशांत्यंतं कुर्यात्। अस्य सग्रहविनायकशांतिकर्मणा यन्तृ॰ स्तु॰
विनायकोपसर्गनिवृत्तिरस्तु॥ ॥इति सग्रहविनायकशांतिविधिः॥ ॥अथ याज्ञवल्क्यो
क्तमूलश्लोकाः॥ विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः। गणानामाधिपत्ये च रुद्रे
ण ब्रह्मणा तथा। तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत। स्वप्नेवगाहतेत्यर्थं जलं मुंडां
श्च पश्यति। कषायवाससश्चैव क्रव्यादांश्चाधिरोहति। अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्राव
तिष्ठति॥ व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः। विमना विफलारंभः संसीदत्यनुनिमित्ततः। २५

तेनोपसृष्टो लभते न राज्यं राजनंदनः॥ कुमारी न च भर्तारमपत्यं गर्भमंगना। आचार्यत्वं
श्रोत्रियश्च न शिष्योध्ययनं तथा। वणिग्लाभं न चाप्नोति कृषिं चैव कृषीवलः। स्नपनं तस्य कर्तव्यं
पुण्येह्नि विधिपूर्वकं। गौरसर्षपकल्केन साज्येनोत्सादितस्य तु॥ सर्वौषधैः सर्वगंधैः प्रलि
प्तशिरसस्तथा। भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः। अश्वस्थानाद्गजस्थानाद्वल्मी
कात्संगमाद्ध्रदात्। मृत्तिकां रोचनां गंधान् गुग्गुलं चाप्सु निक्षिपेत्। या आहृता ह्येकव
र्णैश्चतुर्भिः कलशैर्ह्रदात्। चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः। सहस्राक्षं शतधा
रं ऋषिभिः पावनं कृतं। तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते। भगं ते वरुणो राजा भ

गं स्वर्यो बृहस्पतिः। भगमिंद्रश्च वायुश्च भगं सप्तऋषयो ददुः। यत्ते केशेषु दौर्भाग्यं सी
मंते यच्च मूर्धनि। ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा। नातस्य सार्षपं तैलं स्रुव
णौदुंबरेण तु जुहुयात् मूर्ध्नि कुशान् सव्येन परिगृह्य च। मितश्च सम्मितश्चैव तथा शाल
कटंकटौ। कूष्मांडो राजपुत्रश्च। अंते स्वाहासमन्वितैः। नामभिर्बलिमंत्रैश्च नमस्कारस
मन्वितैः। दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः। कृताकृतांस्तंडुलांश्च पललौदनमे
व च। मत्स्यान्पक्वांस्तथैवामान्मांसमेवां तावदेव तु। पुष्पं चित्रं सुगंधं च सुरां च त्रिविधा
मपि। मूलकं पूरिकापूपांस्तथैवोडेरकस्रजः। दध्यन्नं पायसं चैव गुडपिष्टं समोदकं। एता २८

न्सर्वानुपाकृत्य भूमौ कृत्वा ततः शिरः। विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां। दूर्वास
र्षपपुष्पाणां दत्वार्घं पूर्णमंजलिं। रूपं देहि यशो देहि भाग्यं भगवन्देहि मे। पुत्रान्देहि धनं
देहि सर्वान्कामांश्च देहि मे। ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः। ब्राह्मणान्भोजयेद्द
द्याद्वस्त्रयुग्मं गुरोरपि। एवं विनायकं पूज्य ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति श्रियं
चाप्नोत्यनुत्तमं॥ ॥इति सग्रहविनायकी शांतिः॥ ॥अथ बृहस्पतिपूजा॥ ॥स्कंद उवाच॥
देवदेव जगन्नाथ शूलपाणे वृषध्वज। कथयस्व प्रसादेन पूजां वाचस्पतेर्यथा। स्नानमं
त्रांः कति प्रोक्ताः के मंत्रार्चनविधौ। किंप्रमाणं तु कर्तव्यं जातरूपमयं गुरुं। वृषदाज्येन वरो

हेमि।कमंत्राः पार्वतीपता। एतत्सर्वं प्रयत्नेन कथयस्व सुविस्तरात्॥ ॥ईश्वर उवाच॥ ॥श
शृणुष्वेकमना त्वं वाजीव पूजां महामुनाः रहस्यं परमं गुह्यं यथोक्तं कृत्तिकासुता षडष्टके च
दुःखे कोसवउर्थे जन्मकर्मणि। व्ययस्थे च गुरौ कन्या विवाहो नैव जायते॥ केचिदिच्छंति देवेश
विशिष्टप्रमुखास्थये। कुर्यात्तदास्य तीं पूजां विधिवत्स्नानपूर्विकां। अतिकालाहरलोनात्
कालं नोस्महातपिवा। विधिवत्कारयेत्पूजामखिलारिष्टनाशिनी। पुण्याहे स्थिरनक्षत्रे स्थं
डिले त्रिदशांगुले॥ अष्टौ कुंभांस्ततः स्थाप्य सहिरण्यान् सपल्लवान्। विचित्रवस्त्रसंवी
तान् गंधतोयेन पूरितान्। गेरुका हरिताला च प्रियंगु प्रथमं ततः शिला। प्रथमे तन्यसेत्कुं २७

भे सहादेवी महौषधी॥ यवव्रीहि प्रियंगुश्च सिद्धार्थं नीरोचनाम्मधु। द्वितीये देशकोमं त्रिः
शातमूलाजयंतिका। तृतीये चंदनः कुंकुमं उशीरं कुष्ठ पद्मकौ। अपरे हयगंधा च मुरा मांसी ह
रिद्रका। स्थाप्येतान् घटान् दिक्षु प्रतिविदम्मृचेन तु। अरिष्टा काकजंघा च लक्ष्मणा च सु
दर्शना। कलशे पंचमे मंत्री ब्रह्मजज्ञानमंत्रतः। वचा दारुहरिद्रा च अपामार्गः सत्वंगरः ष
ष्ठे कुंभे तु विन्यस्य इदं विष्णुर्विचक्रमे। कुं दरं यं थिकं धात्री शंनवायेति सप्तमे। गायत्र्याष्टा
ष्टमे कुंभे रक्तचंदनकुंकुमं। स्नानार्थमाहरेन्मंत्रं स्थापयेच्च दिशां प्रति। सोवर्णं कारये
प्रमाणतः॥ वामे तु हस्तकं यष्टी अक्षमाला कमंडलु। वउ बक्तिं गुरुं समें जटामुकुट

मंडितं। पीतवस्त्रपरिधानं मितयज्ञोपवीतिनं। स्थापयेत् स्थंडिले शुभ्रे मंत्रेण ब्रह्मणस्प
ते। आचार्यः प्राङ्मुखो भूत्वा मंत्रसंनद्धविग्रहः। बलिकर्मविधानेन दिक्पतींश्च प्रपूजयेत्
पूर्वदिक्कोणे त्र्यम्बकं शिवसंकल्प दक्षिणे। ततस्त्वश्च इमं मामिति पश्चिमे विन्यसेत् सुधीः। आ
प्यायस्वेति कौबेरे ईशाने प्रतिरथं जपेत्। आ नो भद्रेत्याग्नेये निर्ऋतिकोसि मंत्रतः। कं
नेतु मारुते मंत्री पीवोन्नाद्यादशापूर्वकं। स्वस्ति दिक्षु यथा वेदं रुद्रजाप्यं तु कारयेत्। पश्चा
त्संपूज्य देवेशं सुराध्यं च बृहस्पतिं। इंद्र आसेति मंत्रेण स्थंडिले स्थापयेद्गुरुं। बृहस्पातेति
मंत्रेण कुंकुमेन विलेपयेत्। सुवर्णजातिपुष्पैश्च प्रसूनोयच्छेति प्रपूजयेत्। धूपं वासं च वाने २८

विद्यं मंत्रेणाग्निर्ऋषेण तु। विधिवत्पूजयेद्देवं पश्चात्स्नानं समाचरेत्। दारिणा आद्यवसि
या इन राजन्वस्त्र चर्मणि। अजिनं चर्म आस्तीर्य कृष्णोऽसीत्यभिमंत्रितं। कुमारीं कुरुषं चापि
न्यसेन्नसमन्वितं। सफलोदुंबरीशाखा कन्यापृष्ठे निविन्यसेत्। पश्चात्कुर्वीत विप्रेंद्र
कलशोत्थाभिषेचनं। त्रातारमिंद्रं पूर्वेण इदमापस्तु पश्चिमेन। वनिः पावमानी निर्याम्ये
कोणे निषिंचयेत्। उत्तरेण वरुणेनेन महिन्त्रीणामचेन तु। नार्न जीवेति वायव्ये त्वं यविष्ठे
ति नैर्ऋते। अग्निर्वा इति ईशाने आग्नेये कोसि मंत्रतः। मर्गतेत्यादिभिर्मंत्रैरभिषिंचनु
मंत्रवित्। कृताभिषेका सा कन्या सितवस्त्रैरलंकृता। दध्यक्षतफलैः पुष्पैरर्घं दद्याद्दृ

स्पतेः। नमस्तेंगिरसो नाथ वाक्पते च बृहस्पते। क्रूरग्रहपीडितानां चित्रावान्सुरेश्वर।
रूपं देहि यशो देहि त्वं रिंधमविसलं। पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे। इति
स्नानं ततो मंत्री विधिवत् स्थापयेद्गुरुं। पूर्ववत् स्थापयेद्वह्निं ब्राह्मणं चोपवेशयेत्।
प्रणीताप्रणयनं तत्र बर्हिरास्तरणं ततः। पात्राणां सादनं कृत्वा विशेषश्चात्र कथ्यते।
बार्हस्पत्यचरुं कृत्वा पृषदाज्यघृतं चरुं। पीतवस्त्राणि धेनुश्च दक्षिणार्थं द्विजोत्तमैः। आ
घारावाज्यभागौ च आदिष्टाज्याहुतीः पराः। मूर्ध्नि पृषदाज्येन चतुरावद्य होमयेत्।
वाजस्येमनिमंत्रेण समिन्त्यर्वा होमयेद्वह्निमध्यतः। मधुघृताक्ताः प्रादेशमात्रकीः समिधक २९

मात्। सहस्रं होमयेन्मंत्री बृहस्पतेतिमंत्रिणः। पुनराज्याहुतीर्देया अष्टात्रिंशच्छ्रावणत्
स्थालीपाकेन होतव्याश्चतस्र आहुतीः पराः। प्रथमा वाचस्पतिरिदं आसां द्वितीयया। वा
चस्पतिं विश्वकर्मा तृतीया होमयेद्बुधः। बृहस्पते अतिदर्यश्च चतुर्थी। द्विजसत्तम। ततो स्वि
ष्टकृतं दद्यात् प्रायश्चित्तं यथाविधि। ग्रहयज्ञविधानेन पश्चाद्धोमं तु कारयेत्। ब्राह्मणे वा
समीपीत धेनुं दद्याद्देशके। सवस्त्रां सहिरण्यां च सर्वारिष्टविनाशिनीं। आचार्ययित
तो दद्यात्कर्मसिद्धिप्रयोजनात्। गुरुपूजाप्रकर्त्तव्या कपिलस्य वचो यथा॥ ॥इति बृहस्प
तिपूजाविधिः समाप्ता॥ ॥अथ विवाहादिशुभकर्मप्रकृति विनायकीशांतिः॥ ॥ग्रहशां

त्तिर्वा ॥ तत्र तिनिषिद्धे ब्राह्मणभोजनं वा ॥ स्नानं संध्यातर्पणं ॥ वैश्वदेवः ॥ सर्वं सद्येन
देवपूजा ॥ लिखितगणेशपूजा ॥ वर्णकाचारः ॥ मातृस्थापनं वसोर्धारा ॥ वृद्धिश्राद्धं तेषां क्र
मः ॥ आचमनं प्राणायामः ॥ स्वस्ति नो मिमीतां इति ॥ प्रयोगं कृत्वा सुतस्य विं॰ र्थं गणेशगौर्या
दिमातृणां वसोर्धारासहितानां स्थापन क॰ र्थे ॥ गण्यादं॰ स्तु इत्यादिस्तुत्वां तिर्नविघ्न ॥ अ॰ ग॰
र्थं यथासंपन्नेनान्नेन चतुरो ब्राह्मणानहं तर्पयिष्ये तगवंतो गणेशांबिके तथा आदित्या
दिनवग्रहाश्च प्रीयंतां ॥ श्रीमद्गणपतिं स्थापयामि ॥ गौरीं स्थापयामि ॥ पद्मां॰ शचीं॰ मेधां॰
सावित्रीं॰ विजयां॰ जयां॰ देवसेनां॰ स्वधां॰ स्वाहां॰ मातॄं॰ लोकमातॄं॰ धृतिं॰ पुष्टिं॰ तुष्टिं॰ गो ३°

त्मदेवीं॰ ॥ तत्र श्लोकः ॥ गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा
मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ॥ गणेशेनाधिका ह्येता वृद्धौ
पूज्याश्च षोडश ॥ ऋग्वेदीनां सप्तदश ॥ तासां प्रतिष्ठापूजा ॥ गुडधूपः ॥ नालिकेरार्घः ॥ पूगपत्रा
णि ॥ नैवेद्यानि ॥ अत्र चंदनगं॰ र्थे इदं नैवेद्यं गणेशगौर्यादिमातृभ्यः वसोर्धारासहिता
भ्यो नैवेद्यं वः स्वाहा ॥ गणेशगौर्यादिमातृभ्यो नमः ॥ इति नमस्कारः ॥ ततो वसोर्धारा ॥ गृहस्य
पूर्वकुड्ये वस्त्रखड्गे वा ॥ शतधारमिति मंत्रेण मंत्रावृत्त्या प्राक्संस्था उदक्संस्था वा शिरसि
सम्मीलिता सप्त घृतधाराः कार्याः ॥ गृहनिर्गमवामे च वसोर्धारा च वेदिका ॥ कार्या विवादे बि

द्विजगृहेवेद्यांपूर्वदक्षिणे॥ गृहाद्वैपश्चिमद्वारेतथाउत्तरमेवच॥ वेदिकाचवसोर्धारागृहनि
र्गमदक्षिणे॥ तासांप्रतिष्ठापूजादि॥ ततोवृद्धिश्राद्धं॥ तद्विरव्यात॥ विश्वेषांदेवानांयु
ग्मे॥ पितॄणांचत्वारियुग्मानि॥ अक्रोधनैः०सर्वथा०नांदीमुखंविश्वेदेव०द्यं॥ ए०पूजास्व
स्तिनइंशोदृढश्चवात्मक॥ पू०नं॥ एवंसर्वत्र॥ षि युग्मस्यद्वितीयेब्राह्मणेअवनेजनं॥ एवंतृ
तीये॥ चटे॥ एवंचतुर्थे॥ पितृणामपियवान्गृहीत्वाप्राङ्मुखःप्रदक्षिणांकुर्वीत॥ ॐसर्वथा०
नांदीमुखीमातृश्राद्धे०पादप्रक्षालनंआव०नं॥ द्वितीयेचटे॥ अवनेजनवर्जितसर्वथा०
पूर्ववत्॥ एवंसर्वत्र॥ नांदीमुखपितृश्राद्धे०पा०नं॥ आ०नं॥ नांदीमुमातामहश्राद्धे०पा०आ०नं ३१

नांदीमुखीमातामहीश्राद्धे०पा०नं॥ स्वपादौप्रक्षालनं॥ आचमनंप्राणायामः॥ स्वस्तिनो
मिमीतां०संगमेमहि॥ श्रीगणेशायनमः॥ अपवित्रः०नमःस्वाहायैस्वाहायै०आभ्युदयिक
श्राद्धेपदारणांपवित्रतास्तु॥ पूरादि०प्रबोदयात्॥ जपास्मे०मधु३ अत्राद्यइतिदेश
कालौसंकीर्त्यममसुतस्यविवाहोत्सवकर्मप्रारंभनिमित्तंगोत्राणांनांदीमुखीमातृ०नां
नांदीमुखानांयुग्मरूपाणांगोत्राणांनांदीमुखपितृपि०नां॥ नां०णां॥ गो०नांमातामहप्र०
नां॥ गोत्राणांनां०मातामहीप्र०नां॥ नांदीमुखानांयुग्मरूपाणांनांदीमुखविश्वेदेवपूर्व
कंपार्वणचतुष्टयविधिनायु०आभ्युदयिकश्राद्धमहंकरिष्ये॥ ॐकुरुष्व॥ नांदीमुखावि
श्वेदेवाःइदंवःआसनं॥ गोत्राः०नां०पि०हाःयथाविभागेइदंवःआसनं॥ एवंपार्वणचतुष्टु॥

वटंप्रतिकरणीयं॥ आगछंतु॰ विश्वेदेवास आ॰ नः। विश्वेदेवाः शृणुतेमं हवं मे॰ ध्रुं॥ ओष
धयः॰ सि॥ पुनस्तृतीयवटे नांदीमुखीमातृरावाहयिष्ये उशंतः॰ वो नांदीमुखान् पितॄन् आ
वाहयिष्ये॥ उ॰ वो नांदी॰ मातामहानावा॰ ष्ये॥ उ॰ वो नांदी॰ मातामहीरावाहयिष्ये॥ विश्वेषां
देवानां अर्घा॰ स्तु॥ पितॄणां अर्घाः स्तु॥ १२ पवित्रे दे हे सर्वत्र। शंनो देवी॰ यवोसि॰ अत्र चंद
नादि॥ नां॰ नां विश्वेषां देवानां अर्घाः स्तु॥ ततः पितॄणां अर्घद्वरणं॥ शंनो देवी॰ यवोसि॰
ष्टंकृत्वा हुष्ट्वा नांदीमुखान् लोकान् प्रीणा॰ अत्र चंदनादि॥ नांदी॰ नां पितॄणां अर्घाश्चिनिः स्तु
भूर्भुवः स्वः। नांदी॰ भ्यो विश्वेभ्यो देवेभ्यो नमः॥ यादिव्या॰ एवं सर्वत्र॥ गंधद्वारां॰ सि॥ नांदीमु
खेभ्यः स्थान मसि॥ अत्र चंदनादि॥ यथादत्तं चंदनं॰ नं नांदीमुखा विश्वे॰ हा॥ य॰ गोत्राः नां॰ ३२

मातृ॰ ही॥ य॰ हा॥ एवं सर्वत्र॥ इमानि अर्चिना निज्योतीषि अर्चन विधेः परिशिष्टेन तास्तु॥ आव
मनं॥ भूर्भुवः स्वः अक्षतमी॰ री॥ इति यवान् विकीर्य॥ भोजन संकल्पः॥ पितॄणाम पिहत्वी
रहा॰ वः स्वाहा॥ भूराद्धि॰ उपास्मै॰ मधु ३ अत्राद्य इति देशकालौ संकीर्त्य मम सुतस्य वि
वं गोत्राणां॰ नां॰ नां॥ गो॰ नां॰ पितृपि॰ नां॥ गो॰ नां॰ मातामह॰ नां॥ नां॰ मातामही॰ अमु॰ नां
नांदीमुखानां युग्म रूपाणां नांदीमुख विश्वदेव पूर्वकं पार्वणाचतुष्टय विधिनो धेर्य॰ संकल्प
सिद्धिः॥ विकरः॥ अमो मपाश्च ये जीवाय ज्ञा नागबहिः॰ कृताः॥ तेषा मन्नं प्रदास्यामि विकरं द्वि
हेनवो स्तरणं। पात्रेजपा॰ अवनेजन॥ १२ दधिबदराक्षतमिश्र पिंडदानं॥ १२ प्रत्यवनेजनं॰ त्र

अत्र। एतद्वः०र॥ नांदीमुखेभ्योवासः॥ चंदनादि अत्राछादन०रा। अत्राछाद०स्तु॥ अनेन
पिंडदानेन गृहे०उ०स्तु॥ ततो नमस्कारः॥ ततो वरः। कन्या वा। प्राङ्मुखं देहल्यानुपावश्य
संबंधिनी स्त्री पीतवस्त्राछादिते। इतरस्य वा॥ तस्याः शिरसि शूर्पेण व्रीहीन् अवकिरेत्॥ त
स्य दक्षिणहस्ते लोकं कंकणबंधनं। एवं लोकाचारं कृत्वैव वरः नमस्कारं कुर्यात्॥ अलंकृत्याउ
न॥ पुण्या० इत्यादि॥ सुशांतिर्भवतु॥ अस्य हि०चटे॥ र सार्वषां। दक्षिणाः पांत्वित्यादि॥ संप
द्यंतां। नांदीमुख्यो मातरः प्रीयंतां। नां०खाः पितरः प्रीयंतां। नां० मातामहाः प्रीयंतां। नां० मा
तामह्यः प्रीयंतां॥ यासामुद्दिष्टं ताः प्रीयंतां। येषामुद्दिष्टं ते प्रीयंतां। पवित्राण्यास्त्रीर्यो। नांदीमु ३३

खान् पितृन् वाचयिष्ये। वाच्यतां। नां० मातृभ्यः स्वाहोच्यतां। एवं सर्वत्र॥ ॐ भूर्भुवः स्वः॥ ऊर्जं व
हंतीरमृतं०न्॥ पुनर्दक्षिण॥ अस्य० दे॥ सोम्याः पितरः संतु॥ गोत्रं नो वर्द्धतां इत्यादि॥ चंदने
कुर्यात्॥ नांदीमुखा विश्वेदेवाः प्रीयंतामिति ब्रूहि॥ नां०ऽत॥ आशिषः॥ पिंडाघ्राणं। पात्रचाल
नं। भूर्भुवः स्वः॥ संवरमत्युच्य॥ स्वस्तिनर्वं तो ब्रुवंतु॥ आदित्या० यहाः प्रीयंतां इत्यादि॥ ब्रा
ह्मणहस्ते सुप्रोक्षितादिकं विधाय अद्येत्यादि कालसंकीर्तनं। मम सुतस्य विवा० निमित्तं
सर्वानिष्टपरिहारार्थं गोत्राणां मातृ० नां। गो० पि० नां। गो० मा० नां। गो० णो नां० मातामही०
नां। नांदी० विश्वेदेवपूर्वकं पार्वणवदुद्दिष्ट य विधिना कृतस्य० स्तु। गृहे०उ०स्तु। त्यमूर्भुवा०

म॥ ॥इति वृद्धिश्राद्धविधिः॥ ॥अथ कन्यावरणं लिख्यते॥ अन्यदा तत्र वरस्तु वा परिणे
ताकन्यावरणार्थं गच्छतो वरकान् उदकेन मादाय कन्यापितुर्मंडपद्वारे स्थित्वा अमुकसगो
त्र अमुकशर्माहं इति त्रिः कथयति॥ ततः कन्यादाता स्वयं प्राङ्मुखः पीठोपरि कन्यामु
पावेशयेत्॥ सर्वे कन्यायाः पश्चिमतः उपविशंति॥ वरकाः आचार्यप्रमुखाः कन्याग्रतः पश्चिमा
भिमुखाः उपविशंति॥ अमुकसगोत्रः देवदत्तः अमुकशर्मा वरः अमुकसगोत्राः अमुका २
अमुकशर्माणो वरस्य पितृपितामहप्रपितामहाः॥ अमुकसगोत्राः अमुका २ अमुकशर्म्मा
णः मातामहप्रमातामहवृद्धप्रमातामहाः॥ इति कथयित्वा कन्यां प्रार्थयितारः अस्मै वराय ३४

त कन्यां देहीति॥ ततः कन्यादाता अहं तस्मै उपस्थिता अविकलेंद्रियाय अपापाय दास्या
मीति॥ अंगीकृते तद्वाचयिपको अनाधृष्टमिति मंत्रेण उदकेन स्थाने उदकशरणं कुर्या
त् फलयवहिरण्यमिश्रां हिरण्यपात्रीय श्रियदत्तजां उत्तमथासमयीवा अभिमृशंति॥ ततः आनाप्र
जां॰ दे॥ प्रजां त्वयि दधामि॥ पशूंस्त्वयि दधामि॥ तेजो ब्रह्मवर्चसं त्वयि दधामीति त्रिः आचार्य
वरवित्तसकः आचार्यः कन्यामूर्द्धिनां करोति॥ तिष्ठतु॥ एवं व्रतिपन्ने वरवित्तके गृहं मागत्य
कथिते व्रतिसुता कर्मस्तिवति पश्चात् वध्यामः॥ ॥इति कन्यावरणं॥ ॥ततस्तांबूलदा
नाचारः॥ तत्र वरस्य पादौ प्रक्षाल्य कन्यादाता ललाटे कुंकुमविक्षेपं कृत्वा वस्त्रयुग्मं हेमं कार्प

संवापवीतं ददाति॥ ततो धृतवस्त्रयुग्मस्योपविष्टस्य मांगल्यकरणं कन्यापदा करोति॥ ततो
अक्षतान्गृहीत्वा दक्षिणं जान्वन्वारभ्य॥ इमं मंत्रं पठति॥ तस्मिन् काले अग्निसांनिध्ये स्नाते
स्नाताग्धरोगिणि॥ अव्यंगे अपतिते अक्लीबे वयि कन्यां न विधति॥ ततः सप्तभिः पूगैर्युक्तानि
सप्तनागवल्लीदलानि ददाति॥ पुण्याः॰ इत्यादि॥ दक्षिणासंकल्पः॥ तांबूलदानकर्मणः प्रति
ष्ठासिद्ध्यर्थं हिरण्यं॰ यथां वृद्धपुरुषब्राह्मणेभ्योऽहं संप्रददे॥ ततो वरोऽपि दक्षिणासंकल्पं करो
ति॥ पुण्याहमित्यादि॥ द्विपदश्चतुष्पदेभ्यः सुशांतिर्भवतु॥ अस्य स्थिरपत्रकर्मणः प्रतिष्ठा
सिद्ध्यर्थं हि॰ यथां वृद्धपुरुषब्राह्मणेभ्योऽहं संप्रददे॥ ततो दक्षिणाः पांत्वित्यादि॥ उ॰ नोऽगपत्य ३५

रत॥ इत्यादि सर्वं लौकिकं॥ ततो आशीर्वादाः॥ दृषासि दिवो॰ एता विश्वाः॰ मात्रेनुतः॰
मह्यतन्ते इति॥ इति तांबूलदानं॥ अथ प्रतिक्रनाकर्म॥ ॥ आचमनं प्राणायामः॥ स्वस्त्यय
नं इत्यादि आज्यभागांतं कृत्वा॥ ॐ अग्निर्जनिता स मे अमुकीं देविदां जायां ददातु स्वाहा॥
सोमो जनिमान् स मा अमुकीदेविदाद्या जायया जनिमंतं करोतु स्वाहा॥ पूषाज्ञातिमान्
स मा अमुकीदेविदायै जायायै पित्रा मात्रा भ्रात्रा भिर्ज्ञातिमंतं करोतु स्वाहा॥ इति स्रुवेणा
ज्याहुतीर्जुहोति॥ ततः स्विष्टकृदादि शांत्यंतं कार्यं॥ ॥इतीन्द्राणीकर्म॥ ॥ विवाहात्पूर्वस्मि
न्दिवसे पश्चिमरात्रौ कन्यागृहे वेदिकायां एतस्मिन् कर्म भवति॥ तत्र आचमनाद्याज्यभागां

तं हुत्वा कृतमंगलस्नानां कन्यां अग्नेः पश्चात् उपवेश्य अन्वारब्धायां स्रुवेण जुहोति॥ भूः स्वाहा।
भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वः० हा॥ अग्नये० सोमाय० प्रजापतये० मित्राय० वरुणाय० इं
द्राय० इंद्राण्यै० गंधर्वाय० भगाय० पूष्णे० त्वष्ट्रे० बृहस्पतये० राज्ञे प्रत्यानीकाय
० एवं १७ आज्याहुतयो महाव्याहृतिभिः सह स्रुवेण हुत्वा ततः अस्मिन् विवाहमहोत्सवे न
ष्टनार्थं विस्रस्तः अष्टौ वा अविधवाः ५६ स्त्रियः सुरयान्नेन च अहं तर्पयिष्ये॥ अस्य इंद्राणीकर्म
समृद्ध्यर्थं ब्राह्मणमेकं अहं तर्पयिष्ये॥ इति संकल्पः कुर्यात्॥ कन्यागृहे इंद्राणीकर्म निशा
यां शयने कृते सति पुनः इंद्राणीकर्म कर्तव्यमिति। ततः महाव्याहृतीत्यादि राज्ञे प्रत्यानीका ३६

य स्वाहेत्यंतं हुत्वा विश्रवणाय स्वाहा ईशानाय स्वाहा इति द्वे आहुती अधिके जुहोति॥ एवं
१९ ५६ स्त्री तर्प्पणं॥ ब्राह्मणभोजनसंकल्पः॥ ततः स्विष्टकृदादिशेषं समापनीयं॥ कर्मापि
वर्गे ब्राह्मणभोजनं कर्तव्यं॥ ॥इति इंद्राणीकर्म समाप्तं॥ ॥अथ विवाहकर्मोपहारः॥ ॥
बर्हिः ब्रह्मादि० स्रुवं स्रुवमेखलां वा चरुस्थाली वर्ज्यं लाजाः शमीपत्रमिश्राः॥ शूर्पं उदकुंभः॥
आपस्करः दृषदुपले। शमीगर्भ अश्वत्थ कल्कः॥ मधुपर्कोपहारः॥ कांस्यपात्रद्वयं। दधिमधु
घृतानि मिश्राणि मधुपर्कः कथ्यते। ताम्रपात्रद्वयं अथवा १ मुद्रिका वाससी उपानहौ मीढ
ल १ कंबलः १ यज्ञोपवीते इत्यादि। आचमनाद्याज्यभागांतं हुत्वा। स्वस्तिवाचकब्राह्मणहस्तेषु
सुप्रोक्षितादिकं सुशांतिर्भवतु। अस्य विवाहांगस्य स्वस्तिवाचनकर्मणः समृद्ध्यर्थं द्विज० च॥

स्वस्तिवाचकब्राह्मणेभ्योहंसंप्रददे।दक्षिणाःपांचित्यादि।स्वस्तिनर्वतोकुर्वंतुब्राह्मणाः
स्तेषु।अस्यस्वस्तिवाचनकर्मणो॰वक्तःप्रसादात्॰स्तु।गृ॰न॰स्तु॥ततःआगस्यवरस्यम
स्तकेस्वस्तिवाचकाअक्षतान्मुंचंति॥तदार्दपत्नीरामीगर्भस्थिकृतचकपेषणंकुरुतः॥वद्याः
उत्तरतःत्रीणिपीठानिस्थापयेत्॥तत्रागतावरःकन्याप्रदस्यतिष्ठतःदातुर्दक्षिणतःकन्याज
ननी॥ ॥अथमधुपर्कः॥ ॥ततःकन्यादाताकुर्चंगृहीत्वातिष्ठन्नुदङ्मुखःपठति।ॐसाधु
भवानास्तामर्चयिष्यामोभवंतं।ॐअर्चय॥इतिवरः।प्राङ्मुखस्तिष्ठन्सन्कथयति।ॐकु
र्चः३प्रतिगृह्यतां।इतिदाता।प्रतिगृह्णामीतिवरः।ततःपीठेउत्तराग्रंकुर्चंआरोप्यवरःस्वनि
मुखःउपविशति।वक्ष्यमाणमंत्रेण।अहंवर्ष्मसादृशानांविद्युतामिवसूर्यः।इदंतमधितिष्ठा ३७

मियोअस्मान्अभिदासति॥ततःकन्यादाताउदङ्मुखउपविश्यपाद्यं३प्रतिगृह्यतां।इतिदाता
कथयति।प्रतिगृह्णामीतिवरः॥विराजोदोहोसिविराजोदोहमशीयमयिपद्यायैविराजोदो
हः।इतिमंत्रेणस्वचरणयोर्निनयेत्।अर्घमर्घ्यमर्घ्यंप्रतिगृह्यतां।प्रतिगृह्णामि॥इतिवरःकथय
ति।गृहीत्वामंत्रविनापूर्ववन्निनयेत्।पश्चात्पादप्रक्षालनं।आचमनीयमा॰प्रतिगृह्यतांइ
तिदाता।प्रतिगृह्णामीतिवरः।ततःआपोहिष्ठेतितिसृभिरेकैकयाचमेत्।ततोमधुपर्कयुक्तेकां
स्यपात्रसंपुटीकृत्यगृहीत्वामधुपर्कोऽ३प्रतिगृह्यतांइतिदाता।प्रतिगृह्णामीतिवरः।कांस्यपा
त्रयुग्मंअनेनमंत्रेणगृह्णाति।देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां॥ततो
उद्घाटनं।वरःमित्रस्यत्वाचक्षुषाप्रतीक्षे।इतिवीक्ष्य।देवस्यत्वासवितुः॰मियत्रासेब्रह्मवर्चसा ३८

य॥ इति प्रतिगृह्य सव्ये पाणौ कृत्वा। अंगुष्ठेनोपकनिष्ठिकाच पूर्वद्विनिरुद्धिवा कांस्यस्य

पूर्वार्द्धे विलिंपति॥ ॐ वसवस्त्वा० ॐ। अनेन मंत्रेण पूर्वार्द्धात् गृहीत्वा पूर्वार्द्धे कांस्यस्य विलिंपति

ॐ पितरस्त्वा० ॐ॥ दक्षिणार्द्धे दक्षिणेऽर्द्धे उदकोपस्पर्शनं। आदित्या० न्तु॥ इति पश्चिमार्द्धे० रुद्रा

० इति उत्तरार्द्धे० उदको० विश्वेत्वा देवाः० इति मध्यादूर्ध्वं॥ सकृन्मंत्रेण द्विर्द्विस्तूष्णीं। ॐ नूत्वा प्रा

श्य॥ ॐ नु वः प्रा० ॐ स्वः प्रा० ॐ भूर्भुवः स्वः प्रा०॥ इति प्राश्य। शं नो देवीरभिष्टय० सूर्यद्वयो॥ इति उ

रो निःसृत्य उदकं॥ प्राणपानसि प्राणं मे पाहीति। इति नासिकायां मुखे च॥ स्पृशेत्। ॐ चक्षुषा० ना३

चक्षुषी॥ श्रोत्रपा० श्रोत्रे। ईड्यस्य वा० मि। इति नाभिं। अनुनो मार्ष्टि तन्वो यद्धिलिष्टं। इति मुखं विमृ

ज्य॥ स्थितः सन्ति दाता॥ गौर्गौर्गौः॥ इति पठति। ततः ॐ माता रुद्राणां जमदग्नि तर्गिवो गो। त्रि ३५

ष्टुप्॥ माता रुद्राणां० वधिष्ठ॥ इति वरः पठति॥ ॐ उत्सृजत तृणान्यत्तु॥ इति वरः पठति॥ ततो दा

ता मधुपर्कक्रियौ धेन्वै तृण निदद्यात्॥ तु एषार्ह दी० इत्यादि वरहस्ते। दी० न्तु॥ अस्मिन्मधुपर्कक

र्मणि कांस्यपात्रद्वयं ताम्रपात्रमेकं मुद्रिके वाससी उपानहौ माधुपर्किकीं गां च सर्वदिवमयाय

ब्राह्मणाय वराय तुभ्यमहं संप्रददे॥ वरहस्ते। अस्य मधुपर्ककर्मणः० वरप्रसादात् वक्के० क्रेप्र०

ठ०॥ ॥इति मधुपर्कः॥ ॥ततः कन्यादानं॥ कन्यां वध्वाः प्रदक्षिणमानीय वराद्दक्षिणतः उपवे

शयेत्॥ कन्यादाननिमित्तं वराय एतत्ते पाद्यं। एष वोऽर्घः॥ स्वस्ति न इंद्रो० ॐ॥ पूजापादपादप्रक्षा

लनं। कन्यायाश्च। आचमनं। स्वपादौ प्रक्षालनं॥ आचमनं प्राणायामः। स्वस्त्ययनं॥ श्रीगणेशा

य नमः॥ ॐ अपवित्रः पवित्रो० स्पर्शश्च॥ कन्यादानोप० न्तु॥ नूरादि। उपास्मै० धु रे अत्राद्य इति दे

त्रा कालो संकीर्त्य ॥ श्री० र्थं कन्यादानमहं करिष्ये ॥ वर कन्याभ्यां अत्र चंदनादि पूजनं ॥ यथाद
त्तं० सर्वादिव मयाय वराय तुभ्यमहं संप्रददे ॥ इमानि अर्चितानि ज्योतींषि अर्चन विधेः परिपू
र्णा सन्तु ॥ आचमनं ॥ भूर्भुवः स्वः ॥ अक्षतमी०री ॥ यवान्विकीर्य ॥ यथा दास्यमानं तृप्तिपर्यंतं भो
जनं सर्वादिव मयाय वराय तुभ्यमहं संप्रददे ॥ पुण्याहं० वरहस्ते । कन्यायाश्च ॥ शिवा० सौमन०
अक्षतं० स्वशरीरे दीर्घमायुरित्यादि ॥ सुशांतिर्भवतु ॥ दम्पतिनान् गृहीत्वा ॥ अद्य० देशोच ॥ वर
स्य गोत्राचार ॥ गो० अमुकाख्य शर्मणः प्रपौत्राय गो० अ० पौत्राय गो० अ० शर्मणः पुत्राय गो० अ
मुकाख्य शर्मणे वराय तुभ्यं ॥ गोत्रस्य० अ० शर्मणः प्रपौत्रीं ॥ गो० अ० शर्मणः पौत्रीं ॥ गो० अमु०
पुत्रीं ॥ मम दुहितरं अमु० गो० त्रां अमुकी नाम्नीं कन्यां पंचेंद्रिय निरूपद्रुत शरीरिणीं वस्त्रयुग्मेनाछा ३९

दितां सोपानत्कां सुवर्णरजतादि यथाशक्त्यलंकृतां प्रजापतिदेवतां अमुकसगोत्रः अ
मुकाख्य शर्माहं नोत्रा स्वीकृत पुण्य फलावाप्तिकामः संप्रददे ॥ मयापि दत्ता जननी । इति कन्या
याः दक्षिणं हस्तं वराय दक्षिणे हस्ते ददाति । [redacted] ॥ स्व
स्तीति वरः ॥ ॐ प्रजापतये० यथाणो० ता को दात् ० ते ॥ इति वरः पठति । दाता ॥ ॐ अस्मशता० श
त जपति । अस्य कन्यादान कर्मणः प्रतिष्ठासिद्ध्यर्थं हिरण्यं ॥ सर्वादिव मयाय वराय तुभ्यं सं
प्रददे ॥ अस्य कन्यादानकर्म समृद्ध्यर्थं दास्यमानां गां रुद्रदैवतां यथोपस्करसहितां गं
धाद्यर्चितां सर्वादिव० तुभ्यं संप्रददे ॥ इत्यादि दान संकल्पः ॥ भूयसी संकल्पः ॥ अस्य क
र्म समृद्ध्यर्थं न्यूनातिरिक्त परिहारार्थं यथोत्साहां भूयसीं दक्षिणां नानागोत्रेभ्यो० ब्राह्मणे०

तां॥ दक्षिणाः पांचित्यादि॥ अस्य कन्यादानकर्मणो॰ गृहे॰ उ॰॥
इति कन्यादानविधिः॥ ॥अथ कोउकाबारमंत्राः॥ परस्परमीढुल
बंधनं॥ रेष्यासी॰ परिष्कृतं॥ इति वरः कन्यायै वस्त्रं ददाति॥
चित्तिरा॰ पत्निं॥ इति कज्जलपात्रं गृह्णाति॥ समंजंतु विश्वे दे
वा॰ नो॥ इत्यंजनं करोति॥ यथेयं शची॰ दिमं॥ इति दक्षिणे
हस्ते शलली ददाति॥ रूपंरूपं प्रतिरूपो॰ श॥ आदर्शं वाम ह
स्ते॥ नीललोहितं॰ ते॥ इति कन्या ज्ञातिः हारं बध्नाति॥ मधुमती
रो॰ म॥ इति वरो वधूकण्ठलानि॥ बध्नाति॥ ततः कन्या वरौ ४०

वेदिकामध्ये अग्नेः पश्चात् उपवेश्य॥ अन्वारब्धे उर्वण्णायां आचार्यः स्रुवेण महाव्याहृति
भिस्तिस्रो जुहोति॥ ततः कन्यादाता उदङ्मुख स्तिष्ठन् प्राङ्मुख्या आसीनायाः कन्यायाः शिर
सि स्रुवेण घृतं जुहोति॥ सम्राज्ञी श्वशुरे भव॰ देवृषु॥ स्वाहा॥१ ततः पुण्याहे इत्युक्ते वरः
कन्याहस्तं शमीगर्भस्थितं वक्रचूर्णयुक्तं सांगुष्ठं गृह्णाति॥ गृह्णामि ते सौभगत्वाय हस्तं
॰ देवाः॥ इति मंत्रेण॥ तां पूषंछिव तमां॥ अमोहमस्मि॰ जरदष्टयः॥ इति जपति॥ ततः आचार्यः शि
ग्राच्यां उदकुंभेन वंस्थापयित्वा नूर्भुवः स्वरिति पूरयित्वा आम्रादि पत्राणि निक्षिप्य पाठयति
एद्धिस्त्वन रि॥ इति वरः कन्यामुखात् युग्मान् ब्राह्मणान् स्वयं पाठयेत्॥ एह्यश्मानमाति॰ नः॥ इ
ति दक्षिणेन प्रपदेनाश्मानमाक्रमय्य प्रदक्षिणमग्निं पर्याणीय रेष्यासी॰ तं॥ इति उत्तरीयमन्वा

स्नात॥ ततः आचार्यः कन्याअंजुलौ स्रुवेण १ घृतं मुंचति॥ कन्यादानादद्यौ लाजानी अव
दानद्वयं शूर्पात् मुंचति॥ पुनः स्रुवः १ अभिघारं लाजानां॥ इयं नार्यु॰ हो॥ इति तिर्ष्णीति
पुनः एह्यश्मान॰ तः॥ आननवध्वा दक्षिणपादाग्रेण अश्मानमारोहयति॥ प्रदक्षिणमग्निं॰ य
इयं नार्युपब्रूते॰ हो॥ एवं द्वितीयं॥ अंगुष्ठमात्रा॥ आचारः॥ लक्ष्मी चतुर्थी॥ तस्य द्वितीये अवदाने स
वैंकाणेन वाचयेत्॥ प्रागुदीच्यां॰ सप्त॰ति॥ एष एकपदी नवा॥ क॰ रा॰ आ॰ प॰ क॰ व
स॰ तान्यक्षि॰॥ आपो हिष्ठा॰ वन॥ कं मं गृहीत्वा प्रत्यूर्वं मार्जयित्वा मूर्द्धनि
नियकरं मोचयंति॥ त्रयोपुपविशंति॥ वरः गां ददाति॥ पुण्याहं दी॰ मुशांति नि
वतु॥ विवाहोत्सवकर्मणः सम्हध्यर्थं दास्यमानां गां यथोपस्कर सहितां रु ४१

द्र देवतां आचार्ययितुभ्यं संप्रददे॥ पुण्याहं दी॰ सुशांति र्भवतु॥ अस्य कर्मणः सिध्यर्थं व
स्त्र वस्त्र निष्क्रीभूतं द्रव्यं सूर्यपाठकब्राह्मणेभ्योऽहं संप्रददे॥ अस्य विवाहोत्सवकर्मन्यूना
तिरिक्तं परिहारार्थं यथोत्साहां भूयसीं दक्षिणां नानागोत्रे॰ दे॥ यो यस्य॰ तां॥ दक्षिणां पा
त्रित्यादि॥ एकस्रुवेण स्विष्टकृत्॥ ठ॰ सप्तकं॥ मध्येपाणौ ये रुद्रा॰ तेषामग्र स्रुवे॰
इत्यादि॥ शांत्यर्थं॥ ॥इति विवाहविधिः॥ ॥सायंप्रातर्विवाहमग्निं परिचर्य कर्मन्तत्र
दिनत्रयं कुशंडिकां कृत्वा पूर्णाहुत्या होता आहुति द्वयं स्रुवेण सायंप्रातर्जुहोति॥ तत्रै
वाग्नौ॥ अग्नये स्वाहा॥ अग्नये स्विष्टकृते स्वाहा॥ सप्तकादि तंत्रशेषं समापनीयं ततो
मंडपोद्वासनं वा॥ गृहगमनकाले प्रत्यार्मुंवामीत्यादि ततः स्वगृहं प्राप्ते इह प्रियं १ परादेहि

सुमंगली ४ दृष्टमेतत् ५ आशासनं ६ इहैव स्तं ७ इत्येताः सप्तर्
चो जपेत्॥ वरः स्वगृहे आगत्य मंडपे एव आनडुह कर्म कुर्यात्॥ तद्वि
धिः॥ आचमनाद्याज्यभागांतं कृत्वा आनडुहे कन्यामुपवेश्य अन्वारब्धा
यां पतिघ्नस्त्र आहुतीर्जुहोति॥ अग्निना देवेन० शमयामि॥ अमुकी दे
स्वाहा॥ वा० सू० वं० अघोरचक्षुः० दे॥ इति कन्यायाः शिरसि आज्येन विष्टर्
त॥ कयानः० तिस्रः॥ केशान् अभिमृश्य उत तत्या देव्या० विश्ववेद मगः स्वाहा। मूर्ध्नि स्रु
वं जुहोति॥ कुमारमुत्संगे आनीय तस्याः अंजलौ फलानि दत्वा पुत्र्यार्हं दीर्घमायुरित्यादि
ब्राह्मणहस्तेषु स्वस्तिवाचनं॥ स्वस्ति नवं तो कुर्वंतु इत्यंतं कृत्वा स्विष्टकृद्धोमादि सर्वं समप ४२

नीयं॥ इहैव स्तं० दधिक्राव्णो॥ इत्युक्ते ब्राह्मणं स्वां गृहं प्रवेशयंति॥ दधिक्राव्णो इति द
धिप्राशनं॥ मौनं॥ ध्रुवे धिपा० शांतं॥ ध्रुवं दर्शयति। ध्रुवं पश्यामीति वधूः॥ ॥छ॥
॥ अथ चतुर्थीकर्म॥ ॥ आचमनादि सविंच इत्यंतं कृत्वा॥ अग्नये वायवे सूर्याय
म्के वरुणाय इन्द्राय प्रजापतये जुष्टं गृह्णामि॥ इ चतुर्थी हर्त्री॥ आसनाद्याज्यभागांतं कृ
त्वा अग्नये प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसीत्यादि सप्त निर्मंत्रैश्चतुर्गृहीतेन
सूत्रं चवरुक्ति तिर्होमं कुर्यात्। स्विष्टकृत सप्तकं दक्षिणा संकल्पः। न्यूय सीय॥ सव्यपाणे
स्कृच्छ्रय मित्यादि ब्रह्मणे हूर्ण पात्रं इति कृत्वा वस्त्रकंचुकी परिधाय मांगल्यादि लोकाचा
रः॥ आशीर्वादः॥ ब्रातर्यावाणः० ॥ संगो भिरां गिरसो० इहैव स्तं मा वियोष्टं० देवानां

शं॰॥ ब्रह्मोत्सर्जनादिशांत्यंतं समापयेत्॥ ॥इति चतुर्थीकर्म॥ ॥अथ गर्भाधाना
दिसीमंतोन्नयनपर्यंतं कर्मगणः एकतंत्रेण लिख्यते॥ मातृस्थापनं। वसोर्धारा। वृद्धि
श्राद्धं॥ आचमनादि सविंशत्यंतं कृत्वा। गर्भरक्षणचरुग्रहणं। रक्षोहाग्नये जुष्टं गृह्णा
मि। ३ चतुर्थं गृह्णी॥ रक्षोहाग्नये जुष्टमासादयामि। रक्षोहाग्नये जुष्टं प्रोक्षामि। धात्रे लिं
गोक्तदेवताभ्यः प्रजापतये त्वा जुष्टं प्रोक्षामि॥ समिदादिकं प्रोक्ष्य। त्रोषोदकं चरणी तासु
मुत्तानोदक्षिणनासिकायां निषिंचेत्॥ उपरिष्टात् कृत्वा॥ गर्भरक्षणप्रायश्चित्तं॥ भूर्भुवः
स्वः स्वाहा। अयाश्चाग्ने॰ ब्रह्मणाग्निरिति षड्भिः स्वाहांतानि तैर्ग्निः प्रत्यृचं चतुर्गृहीतं प्र
थमं चरुं जुहुयात्॥ अच्छिद्यात इति वर्गेण प्रत्यृचमाज्येन सीमंतिन्या अंगानि मंत्रलिंगो ४३

क्तक्रमेण चिकृजीत॥ सप्तमो मासोतिक्रांतश्चेत् दिसीमंतोन्नयनस्य प्रायश्चित्तं कृत्वा अ
त्वा। सीमंतिन्या मन्वारब्धायां वनस्पतिर्व्याकृतिभिः स्रुवेणाज्यं कृत्वा अवदानधर्मेण चरुं
जुहुयात्॥ धाता ददातु दाशुषे॰णः स्वाहा॥ ॐ धाता प्रजाया उत राय॰ जुहोत स्वाहा॥
नेजमेष॰ पुमांसं॥ स्वाहा॥ यथेयं पृथिवीम॰ सूतवे। स्वाहा॥ विष्णोः श्रेष्ठेन॰ सूतवे॥ स्वा
हा॥ प्रजापते न॰ णां॥ स्वाहा। त्रिश्वेतया शलल्या ॐ उन्नयति। ॐ भूर्भुवः स्वः इति उदुंबरफ
लाहारं सीमंतिन्या कंठसंगे निधाय। अयमूर्जावतो॰ न वा इति कंठे बध्नाति। उदकपात्रे
कृतान्मुक्ता विष्णुर्योनिं कल्पय एकया। राकामहं इति षड्भिः प्रत्यृचं अच्छिन्नादर्कं पाययेत्॥
नात्र स्वाहाकारः॥ सुपर्णोसि॰ तन्वा॥ इत्युदरं स्पृशेत्॥ पुण्याहं। अधिश्रयणं। श्रितानिधार

णं॥ उभयोः उदगुद्वासनं। श्रितानां उद्वर्धनं उद्वासितानां उपस्थानं। पार्श्वप्रक्षालनादीनि
आज्यभागांतं कृत्वा गर्भाधानकर्मणः कालातिक्रमदोषनिवृत्त्यर्थं प्रायश्चित्तमहं करिष्ये॥
ॐ भूर्भुवः स्वः स्वाहा॥ अयाश्चाग्नेस्य० इदं॥ स्वाहा॥ ततः पुरस्तात्सङ्कं महाव्याहृतिवर्ज्य
यं कृत्वा पर्णफलिनीमूलं निष्पीड्य नासिकायोग्यं कृत्वा॥ उदीर्ष्वातः पतिवती० विह्नि स्वाहा।
इति सीमंतिन्याः दक्षिणनासिकायां निषिंचेत्॥ उदीर्ष्वातो विश्वावसो० इदं स्वाहा॥ न
त्रिवानिर्षिंचेत्॥ गंधर्वस्य० मि॥ इत्युपस्थं स्पृशेत्॥ ततः प्राणेनैरेतोदधामि॥ अमुक
समगात्र अमुकीदेवर्धं अवजिघ्रति। उपरिष्टात्संज्ञं महाव्याहृतिवर्ज्यं कृत्वा उं स
वनप्रायश्चित्तं॥ ॐ भूर्भुवः स्वः स्वाहा॥ अयाश्चाग्नेः० इदं स्वाहा॥ वटशुंगां पेषयित्वा पुरस्ताद्भुवा। ४४

अग्निनारण्ये तन्त्रस्तु शीपस मित्राग्निः पिशंगरूप इति व्रतस्थानेः स्वाहा। तानि सीमंतिन्यां
पुं०स्तु॥ इत्यादि सुशांतिर्भवतु॥ अस्य सीमंतोन्नयनकर्मणः प्रतिष्ठासिद्ध्यर्थं वृषभदक्षिणानि
श्रीभूतं इदं श्री आचार्याय तुभ्यमहं संप्रददे॥ दक्षिणाः पात्वित्यादि स्वस्तिनर्वंतो ब्रुवंतु॥ उभयो
स्तुष्टर्वा यारैकैकमवदानं गृहीत्वा स्विष्टकृत॥ सद्यः पाणो० स्रुच्यं० तिस्रः समिधः
ययो० इदमापः० नं॥ बर्हिर्होमः॥ अमीषां कर्मणां संपूर्त्यर्थं हिरण्य० इदं॥ अथवा यथो आ
क्षांतूयसीदक्षिणां नानागोत्रेभ्यो० दे॥ यो यस्य० नां॥ प्रणीताविमोकः॥ मांगल्यं॥ वरदपिनं॥
आशीर्वादाः॥ ब्रह्मणे पूर्णपात्रं॥ ब्रह्मोत्सर्गः॥ अमीषां कर्मणां संपूर्त्यर्थं यथासंपन्नेना
न्नेन ब्राह्मणमेकं तर्पयिष्ये॥ न्नांन इंद्रानी त्रयो वे॥ अमीषां कर्मणां यन्न्यूनातिरिक्तं० स्तु

पाकयज्ञान्समासाद्यैकार्यानिकाश्चबर्हिषा॥ एकःस्विष्टकृन्नःकुर्यान्नानापिसतिदैवते
इत्याश्वलायनकारिकायां॥ अनेकपाकयज्ञस्यैकस्मिन्कालएवावृत्तौ। समानतंत्र
काकार्यानितंत्रावृत्तिरिष्यते॥ ॥इतिसीमंतोन्नयनकर्म॥ ॥अथजातकर्म॥ ॥नामक
र्म॥ ॥अन्नप्राशनं॥ ॥एतानिएकतंत्रेणकर्तव्यानि॥ ॥पुत्रेजातेहिरण्यश्राद्धं॥ तद्विरच
त॥ जातमात्रश्रवणात्पितुःस्पृश्यत्वं॥ सचैलमंगलस्नानं। वस्त्रपरिधानं॥ तिलकं। देव
दृष्ट्वा॥ आचम्यप्राणायामः॥ पुनराचमनं॥ श्रीगणेशायनमः। ३ सत्त्वयाधः॰ देशका॰
स्तु॥ द्व॰ ३॥ हिरण्यश्राद्धोपकाराणां॰ स्तु॥ तुराद्दि॥ उपास्मे॰ धुः३ मासादिदेशकालौ
संकीर्त्यजातसुतस्यसर्वानिष्टपरिहारार्थंसर्वकामसमृद्ध्यर्थंसर्वदुरितोपशांत्यर्थंआ ४५

युषोभिवृद्ध्यर्थंगणेशांबिकयोःप्रीत्यर्थंआदित्यादिनवग्रहाणांप्रीत्यर्थंआदित्यादिन ४६
वग्रहाणांमातृकुलार्थंनांदीमुखानांप्रीत्यर्थंहिरण्यश्राद्धमहंकरिष्ये॥ पु॰ शि॰ सो॰ आ॰
दीर्घमायुरस्तु॰ इत्यादिसुशांतिर्भवतु॥ दर्भान्दक्षिणात्गृहीत्वाजातसुतस्यसर्वानिष्ट॰ हि
रण्य॰ दे॥ श्रीगणेशांबिकेतथाआदित्यादिनवग्रहाश्चप्रीयंतां॥ जलंजले॥ पूर्वोक्ति॰
जातसुतस्य॰र्थंगोत्रदेवतानांप्रीत्यर्थंयथादास्यमानानिनालिकेरखंडानिगुडघृतस
हितानिकस्मैरविप्राब्राह्मणायतुभ्यंसंप्रददे॥ भगवत्यःगोत्रदेवताःप्रीयंतां॥ ग्रहाणांवि
शेषदानानि॥ ततोभूयसीसंकल्पः॥ अस्यहिरण्यश्राद्धकर्मणःकृतिसांगसिद्ध्यर्थंन्यू
नातिरिक्तपरिहारार्थंयथोत्साहांभूयसींदक्षिणांनानागोत्रेभ्योब्रा॰दे॥ करसंपुटेक

त्वा॥ॐ दक्षिणाः पांक्त्यादिस्वस्तिनवंतो२जलंले॥ अस्य हि रण्य

श्राद्धकर्मणः॰ स्तु॥ गृहे॰ उ॰ स्तु॥ मांगल्यं॥ आशीर्वादाश्च॥

जन्मपत्रिकाश्रवणं॥ ॥इति हिरण्यश्राद्धविधिः॥ ॥अथ जातक

र्मादीनि॥ ॥आचमनादि सवितुर्वरेण्यं तन्त्वा उक्त्वा देवताभ्यो

जुष्टं गृह्णामि॥ ३च उर्ध्वं दत्त्वा॥ शेषाभिमर्शनादि आज्यभागांतं

कृत्वा जातकर्मप्रायश्चित्तं पुरस्तात्॥ ततः बालं दत्त्वा त्रिरवघ्राय॥

ॐ क्रत्वा प्राणिहि॥ यजुषा मम निहि॥ साम्नोदनी हि॥ इति मंत्रं निःश्वासं वा

तस्योपरिष्टात् करोति॥ ततः सर्पिर्मधुनी दध्युदकं एकीकृत्य॥ व्रतेय छामि ४६

मधुमन्मखाय वर्द्ध प्रसूतं सवित्रा मघोना॥ आयुष्मान् गुपितो देवताभिः शतं जीव श

रदो लोके अस्मिन् अमुकसगोत्रदेवदत्त अमुक शर्मन् इति मंत्रात् हत्यादेष्नाति॥ आ

वायेत्॥ दक्षिणे कर्णे उवाक् ३ इति जपति॥ ततः ॐ वाग्देवी मनसा संविदाना प्राणेन व

त्सेन सहेन्द्रोक्ता। जुषतां त्वा सोमनसा यदेवी महीमंत्रवाणी वाणी चा॥ सलिलाम्चयं

त्व इत्यनुमंत्रयते॥ ततः सुवर्णशलाकया तेन बध्नदक्षिणे हस्ते बध्नाति॥ उपरिष्टात् वा॥

१ प्रीति पृ देव

ततः नामकरणप्रायश्चित्तं॥ पू॰ अया॰ जं॥ अवदानधर्मेण चरुहोमः॥ ॐ प्रजापतये

स्वाहा॥ एवं यस्यां तिथौ जातो भवति तां जन्मतिथिं चतुर्थ्यं तां कुर्यात्॥ ॐ अग्नये स्वाहा॥

ॐ कृत्तिकाभ्यः स्वाहा॥ ॐ प्रजापतये स्वाहा॥ ॐ रोहिण्यै स्वाहा॥ ॐ सोमाय स्वाहा॥ ॐ मृगशि

रासस्वाहा॥ एवंत्रीणिनक्षत्राणिसदेवतानियस्मिन्जातास्तवतितन्नक्ष
त्रं मध्येकर्त्तव्यं॥ पूर्वंदेवतंपश्चान्नक्षत्रंसर्वत्र॥ ॐ आयुष्टे०मेस्वाहा॥ ॐ आयु
र्दा०दिर्मस्वाहा॥ ॐ त्वंसोममहे०मेस्वाहा॥ एवंदशाहुतयोकृत्वा ततः ना
गवल्यादिपात्रकं क्रमेनगोत्रशर्मयुक्तं कुमारनामलिखित्वा दक्षिणे कर्णे उच्चैः सक
द्वदेत्॥ पुण्याहंदीर्घमायुरित्यादिब्राह्मणानांहस्तेषुदत्वा अस्यनामधेयांगस्य स्वस्ति
वाचनकर्मणः प्रति०ष्ठार्थं स्वस्तिवाचकब्राह्मणेभ्योहंसंप्रददे॥ योयस्य०तो॥ दक्षिणाः
पांचित्यादि॥ स्वस्तिभवंतोब्रुवंतु॥ अस्यनामधेयांगस्यस्वस्तिवाचनकर्मणो०स्तु॥
॥ ॥ततः अन्नप्राशनं॥ ॥ॐ अन्नपतेन्नस्यनो०देस्वाहा॥ ॐ यच्चिद्धितपुरुषत्रा०न्नास्वा० ४७

हा॥ ॐ अन्नआयूंषि०नो॥ इतिबालमभिर्मंत्र्यस्योनापृथिवी०थः॥ इत्युदगग्रेषुदर्भेषु
उपविश्य॥ भूः इतिप्राशय। भुवः प्राशय। स्वः प्राशय। भूर्भुवः स्वः प्राशय॥ इतिप्रतिमंत्रं हस्तेनेव
प्राशयेत्॥ ततः श्रुतोःस्विष्टकृदादिशांत्यंतं॥ ॥अथचूडाकर्म॥ ॥तत्रपूर्वेद्युः प्रथमरात्रौ
जटाधिवासनं॥ नद्दिनवाप्रातः॥ स्त्रियोबालंतैलेनाभ्यंजंति॥ शिरसोदक्षिणेभागेतिस्रो
जटाउत्तरतोद्वेबबध्नंति॥ धूपार्यतिच॥ इत्यादोलाकाचारकृतमांगल्यंवर्द्धापनं आशी
र्वादाः॥ एववादवावग्निनां०का॥ तंपुर्वादवावग्निना०नोठक्रातवशाक०दा॥ स्वस्तिरिद्धि०
पा॥ कमेर्तनंपु०॥ पा॥ पुण्याहंदीर्घमायुरित्यादिसुर्शांतिर्भवंतु॥ अस्यजटाधिवासनकर्म
णः प्र०र्थेद्धि०ददे॥ दक्षिणाः पांचित्यादिस्वस्तिभवंतोब्रुवंतु॥ अस्यजटाधिवासनकर्मणो०

गृं॰ ०ं॰स्त्र॥ ततः प्रातरभ्युदयिकं कृत्वा व्रीहिपात्रादि ययोक्तं साद्य आचमनादि आज्य
भागांतं कृत्वा। पुरस्तात् रक्ते बलिवर्द्दचर्मण्युपवेश्य प्राङ्मुखं करोति। संदृष्ट्यधं॰ये। इत्यु
क्त्वां॰ति॥ आर्द्रदंतु जीवसे दीर्घायुत्वाय वर्चसा। त्र्यायुषं जमदग्नेः॰षं। अमुकसगोत्र अमुकार
अमुकशर्मन् इत्युक्त्वा त्रयाणां मध्ये प्रथमं दक्षिणकेशपक्षं गृहीत्वा। निरङ्गिः मंत्राहृत्या
त्रिरभ्यनक्ति। शलल्या विजटान् कृत्वा नवनीतेनाभ्यंजनादि ॐ ओषधे त्रायस्वैनं। इति कुशमे
तदंतर्दधाति॥ ...शान् कुशान् तरुणान्वा दर्शनिसंस्पृश्य। ॐ तेजोसि स्वधितिष्टे पिता मे मा हिंसीः॥
इति लोहक्षुरमादत्ते। येनावपत्॰ अय मस्तु वीरः। अमुकसगोत्रः अमुकार अमुकशर्मा
इति केशाग्राणि छिनत्ति। छिन्नान् केशान् गोमये निदध्यात्। ततः आर्द्रदंत्वित्यादि॥ ४८

मंत्रजातं उक्त्वा स्थूणाराजसंज्ञकां एतां महतीं स्थूणामभिमृशेत्॥ ततो यथाविनिर्वृत्तं गृहं का
रयित्वा॥ ॐ सत्यं चेति मंत्रेण पूर्वद्वारे दक्षिणां द्वारशाखामभिमृशेत्। श्रद्धां चेति उत्तरां अ
भिमृशेत्। ॐ यज्ञश्चेति मंत्रेण दक्षिणद्वारे पश्चिमां द्वारशाखामभिमृशेत्। ॐ दक्षिवश्च
ति पूर्वां। ॐ बलं च इति मंत्रेण पश्चिमे द्वारे दक्षिणां द्वारशाखां॥ ॐ ओजश्च इति उत्तरां। ॐ ब्र
ह्म च इति उत्तरद्वारे पश्चिमां शाखामभिमृशेत्। ॐ क्षत्रं च इति पूर्वां। ततः स्थूपोधमणा
राजः इति गृहमध्ये एव स्थूणाराजमभिमृशेत्। ॐ अहोरात्रे इति द्वारफलके। ॐ संवत्सरो
पिधानं। इति द्वारफलपाटं अभिमृशेत्। ॐ ऊर्जा समुद्रे॰तो॥ इति अन्यत्क्रमं समानं स्थूपस्था
निखनेत्॥ ॥अथ वास्तोष्पतिकर्म॥ ॥संध्यस्तर्पणं वैश्वदेव तत्र मातृपूजनं वृद्धिश्राद्धं।

वसोर्धारा ॥ आचमनादि ॥ ॐ अग्निं दध्मि॰दे । इत्यग्निं प्रणीय ॥ प्रागग्रेषु नवयुक्तेषु
नदर्केषु नवं अग्नेरुत्तरतः प्रतिष्ठाप्य ॥ ॐ अरिष्टास्माकं वी॰नं । इत्यग्निमंत्र्य परिसमूह
नादि आज्यभागांतं कृत्वा पूर्ववत्त्रिस्र आहुतीर्जुहोति ॥ मंत्रा यथा ॥ ॐ अग्नित्वा शूरनोनु॰
नक्षुपः स्वाहा ॥ ॐ ईशानमिंद्र तस्थुषो न त्वावाँ अन्यो दिव्यो न पार्थिवोः न जातो न जनिष्यते
स्वाहा ॥ न जातो न जनिष्यते अश्वायंतो मघवन्निंद्र वाजिनः । गव्यंतस्त्वा हवामहे स्वाहा ॥ यदि
पृथक् करोति तदा बल्यादिकं आसाद्य आचमनादि सवितुर्वरेण्यं तं कृत्वा वास्तोष्पतिरु
प्रहणं कृत्वा चरोः संसादनादि आज्यभागांतं कृत्वा अग्नित्वेत्यादिमंत्रैः पूर्ववत्क्तिप्रा
तिस्र आहुतीर्हुत्वा कयानइत्यादिभिः मध्यंदिन प्रात्र्यतिस्रो हुत्वा । वामिद्धीत्यादिभि ५५

रपराह्णप्रा प्राश्य हुत्वा ततो नूनः स्वाहेत्यादिभिर्नवभिर्मंत्रैर्नवविध वह्नितीच्चतगृहीत धर्मेणाहु
त्याः स्विष्टकृती दर्शामीमपि स्थालीपाकस्यैव कृत्वा सत्त्रकादिशेषं समापनीयं ॥ छ ॥ ॥
तस्मिन्नेवाग्नौ मध्यंदिने तत्र परिसमूहनादि आज्यभागांतं कृत्वा कयानश्चित्र आभुवदित्या
दिभिस्त्रिभिर्मंत्रैः प्रत्येकं तिस्रस्तिस्र आहुतीर्जुहोति । ततः स्विष्टकृदादि कर्मापवर्गांतं हुद्धि
णा सह इति कर्तव्यं ॥ छ ॥ ततः अपराह्णे आचमनाद्याज्यभागांतं कृत्वा ॥ ॐ त्वामिद्धि हवामहे
साता वाजस्य कारवः । त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः स्वाहा ॥ ॐ त्वां काष्ठास्व
र्वतः स त्वं नश्चित्र वज्रहस्त धृष्णुया । महस्तवानो अद्रिवः स्वाहा ॥ ॐ महस्तवानो अद्रिवो गा
मश्वं रथ्यमिंद्र संकिर सत्रा वाजं न जिग्युषे स्वाहा ॥ एभिर्मंत्रैस्तिस्र आहुतीर्हुत्वा स्विष्ट

ह्नसूक्तादिर्मंत्रघोषं समापयेत्॥७॥ ततो रात्रावाचमनादि सवितुर्वइत्यंतं कृत्वाद्
ग्निर्ग्रहणं॥ वास्तोष्पतये जुष्टं गृह्णामि॥ श्ववनुर्थंत्रेह्णी॥ वास्तोष्पतये जुष्टमासादयामि॥
वास्तोष्पतये जुष्टं प्रोक्षामि॥ समिदादिकं प्रोक्ष्य शेषोदकं प्रणीतासु मुक्त्वा त्रिः प्रक्षाल
नं॥ अधिश्रयणादि आज्यभागांतं कृत्वा चतुर्गृहीतं कृत्वा दशाचर्जाहुतिर्जुहुयात्। मंत्रा
यथा। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा॥ वास्तोष्पते प्रतिजानीह्
अमीवहा वास्तोष्पते० वास्तोष्पते ध्रुवा० स्मो विष्टकृती दशमी॥ ततो यथाविहितवास्तुदे
वता॥४५ प्रत्येकं चंदनादिभिर्वस्त्रं तांबूलादि पूजा यथाविहिता॥ ततः शोभनादि सुमुहू
र्ते सुलग्ने नूतनगृहे प्रवेशं कुर्यात्॥ ज्येष्ठं पुत्रमादाय जायां च दारुमयधान्योदककुंभं नमहि ५६

तः प्रविशेत्॥ मंत्रस्तु॥ इंद्रस्य गृहं० किं वा स्थितेन॥ प्रवेशसमये पुण्याहवाद्यादि वाद्यगान
घोषेण चतुर्मर्दलि। ततो गृहं प्रविश्य। वास्तुपूजां यथोक्तां बलिदानं च यथोक्तं वास्तुपरितो
गृहं परितश्च कुर्यात्॥ ततो वास्तुदेवताप्रीतये हिरण्यादिदानं यथाशक्तिः॥ ततः शांतंराना
र्दैवात तद्दद्वा यथाशक्ति ब्राह्मणान् भोजयेत्॥ भूयसीं संकल्प्य॥ मांगल्यं। आशीर्वादाश्
॥ ॥इति वास्तुकर्म॥ ॥अथोपाकरणं॥ ॥बह्वृच ऋषितर्पणं कर्तव्यं॥ तच्चोत्तरक्रमेण
स्याम॥ अधुनात्र क्रमपठितापाकर्मविधिर्लिख्यते॥ ऋषितर्पणानंतरं गृहमागत्य आ
चमनादि सवितुर्वइत्यंतं कृत्वा अक्षतसक्तूनां धानानां ग्रहणं॥ तन्मंत्रः। अग्नये पृथिव्यै
भ्योऽग्नये शार्कंतकायाग्नये मित्रावरुणाभ्यामग्नये मरुद्भ्योऽग्नये देवेभ्योऽग्नय इंद्रासोमाभ्यामिंद्रा

याग्नामरुश्चः पवमानसोमायाग्नये विश्वेभ्यो देवेभ्यो जुष्टं गृह्णामि ॥ एवं चतुर्थं दद्व्ली ॥ अग्न
ये त्वा० विश्वेभ्यो देवेभ्यो जु० मि ॥ अग्नये त्वा० व्यस्त्वा जु० मि ॥ ह्यालनाधिश्रयणं श्रिताभिघार
णानामन्वा ॥ तदुक्तं कारिकायां ॥ तस्याभिघारणं वेष्टं श्रितस्योद्वासितस्य वा . स्या
दधिश्रयणान्नावसन्कादोत्वे कर्मजनं उद्वासनपार्श्वद्वन्द्वात्तनयोरन्नावः ॥ दधि छन्तमि
श्राणां स्कवेणाप्रत्यभिघारणं कर्त्तव्यं ॥ समद्रदशासमिधमित्यारभ्य मध्येन्याकुनयहुत्वं तं कृ
त्वा ॥ अद्भुतस्तुक्तानां ध्मनानां च दधिघृतमिश्राणां चतुर्गृहीतं ऋचावक्ष्यमाणाभिः ऋग्भिः
स्वाहांतानि दिमिःकार्य ॥ तत्प्रकारः ॥ अग्निमीले मधुछंदा अग्निर्गायत्री ॥ उ ऋर्भुवकोगस्त्यो
पृणस्त्रयेनुष्टुप् ॥ त्वमग्ने गृत्समदो अग्निर्जगती ॥ आवदन् गृत्समदोः राकुंतको जगती ॥ मा ५७

मस्य माविश्वामित्रोऽग्निस्त्रिष्टुप् ॥ गृणानाजमदग्निर्मित्रावरुणौ जगती ॥ त्वां ह्यग्ने वामदेवो
ग्निरष्टिः ॥ धमेत वामदेवो ग्निर्जगती ॥ अबोध्यग्निर्बुधगविष्ठिरावग्निस्त्रिष्टुप् ॥ गंतान ए
वयामरुन्मरुतोतिजगती ॥ त्वंह्यग्नेनरद्वाजोग्निस्त्रै त्रिष्टुप् ॥ योनः स्वः पायुर्द्वात्रनुष्टु
प् ॥ अग्निन्तरो वसिष्ठोग्निर्विराट् ॥ प्रतिवक्ष्य वसिष्ठ इंद्रा सोमावनुष्टुप् ॥ मा विदन्नगाथ इं
द्रो बृहती ॥ आग्नेयाद्विमोन्तरि श्यावाश्व मरुतोनुष्टुप् ॥ स्वादिष्ठयामधुछंदा पवमानः सोमोगा
यत्री ॥ यत्ते राजन् कश्यपः पवमानसोमः पंक्तिः ॥ अग्ने ह्रद्रत्रितोग्निस्त्रिष्टुप् ॥ तर्छंयोः शंयु
र्विश्वेदेवाः शक्करी ॥ ततः स्विष्टकृत् ॥ ततो वक्ष्यमाणं सर्वे ब्राह्मणाः पठेयुः ॥ तद्धाते ॥ अग्नि
मीले पुरोहितं वर्ग २ पावकानः सरस्वती ऋव २ अयं देवाय ॥ तद्विस्तोकं १ एतायामोपा ऋ

यंवा।प्रमन्महे।इंद्रोमदाय।आनोनद्य वर्ग२ हेविरूपे।प्रतीकमात्रं।जातवेदसे सूक्त१ इदंश्रेष्ठं।
प्रवःपांतं।सुषुमायातं।वहूरुशा।अस्यवामस्य सूक्तं१ तन्नुवोवामा।नावामद्यता।निह्वोता
गणानांत्वा सूक्त१ समाममविद्धि।मंदस्वहोत्रात्।।अंबितमेवर्ग३ प्रयत्ना।र्कः।त्रातधमरमुस्मं
सूक्त१ इदंतित्वा।इंद्रत्वा।नता।तस्मवितुसूक्त१ वैश्वानराय।एवात्मा।कयानःसूक्तं१ प्रस्तु
त्यः।हंसः।सुविषत्।सूक्त१ तंतस्यगोपो।हिरण्यवर्णा वर्ग४ इदमुत्यत्।त्वामग्नेमहिमहे।प्र
युंजती।स्वस्तिनोमिमीता वर्ग१ तन्नस्यगोपो।हिरण्यवर्णा वर्ग४ त्वंहिदैनवत्।पिबासोमं
इंद्रवः।यज्ञायज्ञावः।इयमदेदात् वर्ग३ सुषेनरा।जुषस्व।उग्रोजज्ञे।त्वांवती वर्ग३ प्रब्रह्म।
त्र्यंबकं सूक्त१ यदद्य।तच्चक्षुः सूक्त१ मन्यु।प्रहोदसा वर्ग२ तिस्रोवाचः।दूरात्।यइंद्र।वयम्नु ५८

प्रकृतानि।त्वावतः।आत्वा।आतूनइंद्रक्षुमंतं सूक्त१ आप्रा।इंद्रायसाम।स्वादिष्ठया वर्ग१ सो
मःपुनानः।प्राणा।हिन्वंति।यःपावमानी सूक्त२ धर्त्ता।असर्जि।पुरोजिती।अयंसः।निवर्त्तध्वं
नइंनोपाद १ प्रमा।अबुध्रं वर्ग६ प्रहोता।माप्रगाम वर्ग१ येयज्ञेन।परावतो वर्ग३ सकुमिकृ
क१ देवानां।इमंमेगंगे सूक्त२ विहिमोतोः।सहस्रशीर्ष सूक्तं१ हृदये।आसुः वर्ग१ तनात।नूनं।नि
पुसीद सूक्त१ तदित्।रात्री वर्ग३ त्यंचित्।महित्रीणा वर्ग१ तन्तंव समत्यं वेतिसमाप्ति पर्यंतं।।अ
स्मिन्वेइत्याद्यरण्यसर्वध्यायाः परमेवितततः।शिक्षा।कल्पः।व्याकरणं।निरुक्तं।गृह्य।उपनि
षत्।प्रातिशाख्य।कृष्विधान।सुपर्णाध्यायः।स्वयंभुवेनमस्कृत्य इत्यादिमनुस्मृतिः।।योगीश्व
रंयाज्ञवल्क्यं इत्यादियाज्ञवल्क्यः।सर्वास्मृतयः।पुराणादिसर्वं।मीमांसा।सर्वाणिशास्त्राणि

त्युपाकर्म ॥ ॥ समाप्तं ॥ ॥ अथ आतुरसमये वैतरण्यादिदानसंकल्पविधिः ॥ ॥ तस्य
प्रकारः ॥ विष्णुपूजा ॥ यथावकाशं तत्र वैतरण्यादिदानप्रारंभनिमित्तं विष्णुपूजनमहं क
रिष्ये ॥ इति प्रयोगः ॥ वैतरणीदानप्रतिगृहीत्रे ब्राह्मणाय एतत्ते पाद्यं ॥ एष वो अर्घ्यः ॥ पूजा ॥
पादप्रक्षालनं आचमनं ॥ स्वपादप्रक्षालनं आचमनं । गृहं गत्वा । प्रांगउ० ॐ विष्णुः ३ अप
वित्रः पवित्रो वा० इदं विष्णु० सप्तव्याधा० दृष्टि० च ॥ वैतरण्यादिदानोपचाराः० स्नु ॥ तूराद्रि
तपास्मै० मधु ३ अद्य श्री इत्यादि गृहायतनादेवब्राह्मणानां च संनिधौ एवं गुणविशिष्टेषु
ण्ये काले देशे वा अमुकस्य आतुरकालनिमित्तं सर्वपापक्षयार्थं शास्त्रो० थं वैतरणीदान
महं करिष्ये ॥ ब्राह्मणस्य पूजा । यथादत्तं० मुद्रिकाकषायनानि तन्त्रिश्री दत्तं इदं वैतरणी ५९

दानप्रतिगृहीत्रे ब्राह्मणाय तुभ्यं पाद्यं ॥ उच्यं संप्रददे ॥ सवत्सा गोः पूजनं ॥ अर्चनं० स्नु ॥ ॥
आचमनं । अपहता० अहन्नमी० उदको प० यथा दास्यमानं दक्षिणपर्यंतं० वैतरणी दा० दे ब्रा
ह्मणहस्ते सुप्रोक्षितमस्तु ॥ दीर्घमायुरस्त्यादि सुशांतिर्भवतु उत्तराभिमुखो ब्राह्मणः ॥
दाता पूर्वाभिमुखः ॥ दक्षिणां आचाम्य दर्भाक्षतान् गृहीत्वा अद्येत्यादि प्रयोगस्तु कार्यः ॥ अमुक
गोत्राय अमुकशर्मणे अमुकवेदाध्यायिने ब्राह्मणाय उच्यं अमुकसगोत्रः अमुकनामा
अमुकशर्माहं वैतरणीसंज्ञिकां गां सवत्सां गंधपुष्पधूपाद्यर्चितां रुद्रदैवतां सोवर्णशृंगीं र
जतखुरां ताम्रपृष्ठां कांस्यदोहनां रक्तवस्त्रयुगाच्छादितां व्रीह्यादिसप्तधान्यसहितां लवण
परिमितकर्पासा परिनात्र नाजनस्थितलोहदंडधारिमहिषारूढादिमधर्मराजमूर्त्तिसहितां प

द्दृ स्तत्र बद्धेन्तु दंडनोकाङ्क्षितां यमद्वारे वर्त्तमानां शतयोजनविस्तीर्णां अगाधं पूयशोणि
तायां मांसकर्दमां अस्थिकेशेषु रेव वक्त्रतुंडैर्नानाविधैः कृमिभिः संकुलां अन्यैश्च मर्मभित्तिदि
भिर्नक्रमकरशिशुमारग्राहादिभिर्जलचरैः प्राणिभिः संकीर्णां दृढामतिभयावहां एवं
विधां वैतरणीसंज्ञकां नदीं तर्त्तुकामः संप्रददे॥ नमम। गोपुच्छं जलकुशान्वितं सहितं
विप्रहस्ते दद्यात्॥ ततो दक्षिणासंकल्पः॥ पूर्वोक्तगुणविशिष्टे पुण्ये काले देशे वा अमु
कसगोत्रः अमुकशर्माहं अस्य वैतरणीदानस्य सांगतासिद्ध्यर्थं इदं सुवर्णं अग्निदै
वतं गंधाद्यर्चितं दक्षिणां संप्रददे। नमम॥ अनुमंत्रणं॥ यमद्वारे महाघोरे या सा वैतर
णी नदी। तर्त्तुकामो ददाम्येतां अस्यं वैतरणीमिति॥ विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन॥ स २६

दक्षिणो मया दत्ता अन्यां वैतरणीं वगो॥ इति ब्राह्मणं प्रणम्य॥ सर्वप्रदक्षिणां कुर्यात्॥ पु
च्छं गृहीत्वा ब्राह्मणेन गां आकर्षयेत्॥ तत्र मंत्रः॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये। उत्ति
तीर्षुरहं देवि वैतरण्यै नमो नमः॥ ततो भूयसी दक्षिणा॥ यजमानमांगल्यकरणं। गवादिस
र्वं सुपस्कारजातं ब्राह्मणस्य गृहं नयेत्॥ ॥इति वैतरणीदानं॥ ॥अथ ऋणधेनुदानं॥ ॥
विष्णुपूजा। पादप्रक्षालनं॥ आचमनं प्राणायामः॥ अद्येत्यादि प्रयुज्य ऋणधेनुदानमहं क
रिष्ये॥ ब्राह्मणस्य पूजा॥ गोजनसंकल्पः॥ सुप्रोक्षितादि। अद्यादि० ऋणधेनुसंज्ञकां गां
सवत्सां गंधाद्यर्चितां रुद्रदेवतां सुवर्णशृंगीं राजतखुरां ताम्रपृष्ठीं कांस्यदोहनां दवषिपि
तृ सर्वं बंधि ऋणत्रयापाकरणार्थं तुभ्यमहं संप्रददे॥ ॥इति ऋणधेनुदानं॥ ॥प्रायश्चित्तधे

नुदानं॥ ॥अनेन विधिना वा॥ ॥अथ अष्टमहादानानि॥ ॥तिलालोहं हिरण्यं च कार्पासं
लवणं तथा। सप्तधान्यं क्षितिर्गावः एकैकं पावनं स्मृतं॥ अद्येत्यादि पूर्ववत्। तिलादीन्यष्टौ
महादानानि नानादेवतानि नानाफलदातॄणि तत्तद्दानफलप्राप्त्यर्थं कस्मैचिद्ब्राह्मणा
य अहं संप्रददे। न मम॥ ॥इत्यष्टमहादानविधिः॥ ॥पूर्वोक्तगुणविशिष्टे पुण्ये काले
देशे वा॥ अन्नोदकं सुवर्णं च रजतं वस्त्रमुपानहौ॥ कमंडलुं छत्रं च शिरस्त्रिष्टका लोहदंडः।
तांबूलं चंदनं व्यजनं पुष्पाण्यादर्शः। एतान्युपदानानि नानादेवतानि गंधाद्यर्चितानि क
स्मैचिद्ब्राह्मणायाहं संप्रददे॥ न मम॥ इति षोडशोपदानविधिः॥ ॥पूर्वोक्तगुणविशि
ष्टे पुण्ये काले देशे वा। इदं ताम्रपात्रं यथोपस्करसहितं तिलपूरितं गंधाद्यर्चितं सदक्षिणं ६१

शास्त्रोक्तपुण्यफलावाप्त्यर्थं कस्मैचिद्ब्राह्मणायाहं संप्रददे॥ न मम॥ इति तिलपात्रदा
नं॥ ॥अथ घृतपात्रं॥ पूर्वोक्त्वा॥ इदं कांस्यपात्रं घृतपूर्णं गंधाद्यर्चितं सदक्षिणं कस्मैचिद्ब्रा
ह्मणायाहं संप्रददे। न मम॥ इति घृतपात्रं॥ अथ पददानं॥ पूर्वोक्त्वा॥ इदमासनादिदश
विधं पदं यथोपस्करसहितं भोजनदक्षिणातांबूलसहितं शास्त्रोक्तपुण्यफलावाप्त्यर्थं क
स्मैचिद्ब्राह्मणायाहं संप्रददे॥ ॥इति पददानं। स्त्री चेत्॥ इमां वंशपात्रीं कुंकुमादियथो
पस्करसहितां वस्त्रसुवर्णाभरणादिसहितां इह जन्मनि जन्मांतरे च अखंडसौभाग्यप्राप्त्य
र्थं अहं संप्रददे। न मम॥ इति वंशपात्रीदानं॥ ॥इति हिरण्यादिदानानि॥ ॥न्यूयमीसं २
कल्प॥ अमीषां दानानां न्यूनातिरिक्तं परिपूर्णार्थं हिरण्यदक्षिणां निष्क्रयं यथादास्यमानं

इदं नानागोत्रेभ्यो ब्राह्मणेभ्योऽहं संप्रददे ॥ न मम ॥ इति द्वयमी संकल्पः ॥ अथ मरणानं
तरं षट्पिंडाः ॥ तेषां क्रमः ॥ उत्क्रांतौ द्वारदेशे विश्रांतौ चितास्थाने शवहस्ते संचयने ॥ ते
षां विधिः ॥ ॥ आचमनं प्राणायामः ॥ विष्णुः ३ अपवित्रः सर्वावस्थां ॥ देवताभ्यो महायोग
भ्य एव च नमः ॥ ३ श्राद्धभूमौ॰ गयायां स्वयमेव जनार्दनः ॥ तं ध्यात्वा देशकालपात्र द्रव्यश्र
द्धाः संपत् ॥ अपसव्यं ॥ दक्षि॰ द्य ॥ उत्क्रांत्यादिपंचपिंडदानोपचाराणां पवित्रता ॥ नूराद्वि
मधुवाता॰ मधु ३ अद्यादि मासे पक्षे तिथौ वासरे यथा वर्तमाननक्षत्रयोगकरणपर्वमु
हूर्तसमवाये एवंगुणविशिष्टायां पुण्यतिथौ अमुकतीर्थे देवब्राह्मणानां च संनिधौ
एवंगुणविशिष्टे पुण्ये काले दशेवा अमुकसगोत्रस्य अमुकप्रेतस्य शास्त्रोक्तपुण्यफल ६२

वाप्त्यर्थं उत्क्रांत्यादिपंचपिंडदानमहं करिष्ये ॥ स्मरणं ॥ पात्रे जपः ॥ अमुकसगोत्र अमु
कप्रेत अवनेनिक्ष्व ॥ ॥ गोत्रप्रेत एतत्ते पिंडं ॥ प्रत्यवनेजनं ॥ पूजा ॥ नैवेद्यं दास्यमा
नं आमान्नं यथोपस्करसहितं गो॰ प्रेत एतत्ते ॥ अस्य उत्क्रांत्यादिपंचपिंडदानक
र्मणः सर्वं परिपूर्णं ॥ एभिः पिंडदानैः गोत्रस्य प्रेतस्य दहनयोग्यता वास्तु ॥ शास्त्रो॰ छिं
न्यूनातिरिक्तं परिपूर्णं ॥ नई कर्णेनिरिति पिंडत्रयविसर्जनं ॥ ततः अपेत वीत वि च स
र्पतातो॰ स्मै ॥ अनेन मंत्रेण पलाशशाखया चितास्थानं विमृज्य पंचभूसंस्कारान् कृत्वा
अग्निं संस्थाप्य ॥ शवं उत्तानं चितौ निपात्य ॥ अयं वै त्वत्वमस्मादयं तयोनिस्त्वमयोनिः स्प २
जातावदो वदस्त्वैनं सुकृतां यत्र लोकः ॥ अयं विन्वा मञ्ज नयदयं त्व दधिं जायतां ॥ गोत्र॰ प्रेत॰

स्वर्गायलोकायस्वाहा॥प्रदीप्तेसोमिनमश्वंइतिदक्षिणञ्चवेजपेत्।सद्याहतानविद्य
माणाःप्रागुदञ्चःप्रक्रामंति।पुरोहितःअन्योवामृत्योःपदमितिद्वाभ्यांमृत्स्यांप्रक्रामतःस
पिंडान्अनुमंत्रयते।मृत्योःपदंयोपयंतोयदैतद्राघीयआयुःप्रतरंदधानाः।आप्याय
मानाःप्रजयाधनेनशुद्धाःपूताभवतयज्ञियासः।इमेजीवाविमृतैराववृत्रन्नभूद्भद्रा
देवहूतिर्नोअद्य।प्राञ्चोअगामनृतयेहसायद्राघीयआयुःप्रतरंदधानाः।आपोहिष्ठालक
मनावसोमवर्गःइतिउदकस्पर्शः।ततोमज्जंति॥ततःअमुकसगोत्रःअमुकप्रेततिलो
दकांजलिस्ते।इत्येकामुदकांजलिंदद्यात्॥आपोअस्मान्मातरःशुंधयंतुघृतेननोघृत
प्वःपुनंतु।विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि।अनेनमंत्रेणबहिःसं ६३

निःसरंति॥नातावस्त्रंपरिधाय।तच्चक्षुरित्यृचाआदित्यमुपस्थाय॥ततोस्थिसंचयनंअ
युग्मासुरात्रिषु॥अपसव्यं॥यंत्वमग्नेसमदहस्तमुनिर्वापयापुनः।कियाम्ब्वत्ररोहतुपाक त्रं २
दूर्वाव्यल्कशा॥शीतिकेशीतिकावतिह्लादिकेह्लादिकावति।मंडूक्याःसु[illegible]गमइमंस्वग्नि
नंहर्षय॥आभ्यांमंत्राभ्यांसक्षीरेणोदकेनैनास्थीनिसंसिच्यपलाशपुटेनउद्धृत्यमृन्मये
कलशेवालसंयुक्तानिअस्थीनिमुक्त्वा।उत्तेस्तभ्नामिपृथिवींत्वत्परीमंलोकंनिदधन्मोअ
हंरिषं॥एतांस्थूणांपितरोधारयंतुतेत्रायमःसादनातेमिनोतु॥इतिलोष्ठेनापिधायह्लाक
वं॥उच्छ्वंचस्वपृथिविमानिबाधथाःसूपायनास्मैभवसूपवंचना।मातापुत्रंयथासिचाभ्ये
नंभूमऊर्णुहि॥अनेनमंत्रेणखातंनिखायउच्छ्वंचस्वमानापृथिवीसुतिष्ठतुसहस्रंमित

उपदिश्यतां। तिलगृहाणौ(?) घृतंतु सुताः नवं तु विश्वाद्यास्मिन्राश्रणः संत्वत्र॥ अनेन मंत्रेण अ
शानश्रावस्य अवस्थापयेत्। खातं मृदापूरयेत्॥ ततः पिंडदानं॥ आचमनं प्राणायामः॥ अप
वित्रः०रे। मन्त्रव्याधः० इत्यादि॥ अपसव्यं॥ द०अ॥ अस्थिसंचयन पिंडदानोपहाराणां पवि
त्रता। तूरादि॥ मधुरे अद्यादि एवं गुणविशिष्टायां पुण्यतिथौ। गोत्रस्य प्रेतस्य अस्थिसंचय
न पिंडदानमहं करिष्ये॥ पात्रे जपास्तरणं। अवानजनं पिंडदानं प्रत्यवनेजनं। पूजा नैवेद्यं
अत्रा०नैवेद्यैः पिंडस्यार्चन विधेः परिपूर्णता। अनेन पिंडदानेन गोत्रस्य प्रेतस्य शास्त्रोक्त
पुण्यफलावाप्तिः। न्यूनातिरिक्तं०र्णं॥ अनेन पिंडदानेन गोत्रस्य प्रेतस्य परलोके शा०प्तिः॥
न्यू०र्णं॥ दुग्धोदकदानयोग्यताप्राप्तिः॥ नईकरणेनिरितिविसर्जनं॥ ॥तृतीयदिवसे संध्या ६४

काले त्रिषु मृन्मयेषु पात्रेषु अस्थिसमीपे दुग्धोदकदानविधिः॥ आचमनं प्राणायाम
अपवित्रः०रे। मन्त्रव्याधः० संपत्। अपसव्यं। दक्षि०। दुग्धोदकदानोपहाराणां पवि
त्रता। तूरादि। मधुरे अद्यादि मासे पक्षे तिथौ गोत्रस्य प्रेतस्य शा०र्थं दुग्धोदकदानमहं
करिष्ये॥ गोत्र प्रेत आकारो दुग्धं पिब। एवं त्रिषु पात्रेषु। गोत्र प्रेत आकारो उदकं पिब।
एवं त्रिषु॥ अस्य दुग्धोदकदानकर्मणो यन्न्यू०र्णं॥ अनेन दुग्धोदकदानेन गोत्रस्य प्रेत
स्य शा०प्तिः॥ न्यू०र्णं॥ दशाह पिंडदानयोग्यताप्राप्तिः॥ नईकरणेनिरितिविसर्जनं॥ ॥
ततः दशाहपिंडदानं॥ तत्प्रकारः॥ तीर्थे गत्वा स्नानं संध्यावंदनं स्मरणमात्रं। त्याज्यवस्त्र
परिधानं॥ आचमनं प्राणायामः॥ विष्णुः॥ ३ अपवित्रः०रा॥ मन्त्रव्याधः० देवतान्योमहागिन्यं

एवचनमः॥२ श्राद्धं॰ स्वयमेवजनार्दनः॥ तं॰ त्वादेशा॰ ता॥ अपसव्यं॥ दक्षिं॰ख॥ प्रथमाद्द
आदिदशाहपिंडदानोपकाराणां पवित्रता॥ सूरादि मधुवाता॰ मधु३ अद्यादि मासेपक्षे
तिथौ अमुकसगोत्रस्य प्रेतस्य मूर्द्धादिदेहावयवप्राप्त्यर्थं शास्त्रोक्तपुण्यफलावाप्त्यर्थं
प्रथमाह्नादिदशाहपिंडोदकदानमहं करिष्ये॥ सव्यं॥ विष्णुपूजा॥ पात्रेजपः॥ पिंडद्रव्याणि
पिष्टदुग्धघृतमधुतिलउदक॥ अवनेजनं गोत्रप्रेत अवनेनिक्ष्व॥ गोत्रप्रेत एतत्ते प्रत्य
वनेजनं॥ अत्र॥ प्रेतायवासः॥ पूजा॥ निवेद्यं॥ अत्राछादनं॰ छो॥ गोत्रप्रेतपिंडार्चनं ते। एतिष्ठ
य॰ दश॰ नि॰ गोत्रस्यप्रेतस्य न॰ क्षि॥ सव्यं आचमनं॥ सुप्रोक्षितादि॥ अपसव्यं॥ नोजनं गोत्र
प्रेततिलोदकांजलिस्ते। एकांजलिः पिंडोपरि दद्यात्॥ ततः प्रभृतिदशाहपर्यंतं द्वे द्वे अंजुली ६५

अधिके दद्यात्॥ एवं शत १०० नवति॥ अस्य पिंडोदकदानकर्मणो॰ परिपूर्णं॥ अनेन पिंडोद
कदानेन गोत्रस्यप्रेतस्य मूर्द्धादिदेहावयवप्राप्तिः॥ शास्त्रोक्तपुण्यफलावाप्तिः॥ द्वितीयाह्न
पिंडोदकदानयोग्यताप्राप्तिः॥ न्यूनातिरिक्तं परिपूर्णं॥ एवं दशाहपर्यंतं॥ दशमेदिवसे पिंड
दानानंतरं तिलकल्कोक्षोदकदानयोग्यताप्राप्तिः॥ ततः स्नानं॥ दशाकर्षं कुर्यात्॥ रेखा१॰मु
ख४ विस्ती॰ वितस्तिलंबा॥ तत्प्रकारः॥ आचमनं प्राणायामः॥ विष्णु३ अपवित्र॰ वि॰॥ इदं
विष्णुर्वि॰ रो॥ सप्तव्या॰ संपत॥ दक्षिं॰झ॥ तिलकल्कोक्षोदकदानोपकाराणां पवित्रता॥ सू
रादि मधु३ अद्यादि॰ एवंगुणविशिष्टायां॰ तिथौ गोत्रस्यप्रेतस्य नलापनुत्त्यर्थं पितृत्वप्रा
प्त्यर्थं दशाकर्षं तिलकल्कउक्षोदकदानमहं करिष्ये॥ गोत्रप्रेत तैलेनाद्य॥ एवं दशकल्केनो

दत्तंय। एवं दशसु॥ गोत्रप्रेतउष्णोदकेन स्नाहि। एवं दशसु॥ अस्य तिलकल्कोष्णोद
कदानकर्मणः पूर्णं। अनेन तिलकल्कोष्णोदकदानेन गोत्रस्य प्रेतस्य मालापनुत्तिः सु
खिप्राप्तिः॥ शास्त्रोक्तपुण्यफलावाप्तिः॥ एकादशाहकर्मयोग्यता प्राप्तिः॥ न्यूनाः पूर्णं
वस्त्रत्यागः॥ वपनं। स्नानं॥ ॥इति दशाहपिंडविधिः॥ ॥अथ एकादशाहः॥ ॥तीर्थे गत्वा
स्नानं। स्नानांगतर्पणं॥ संध्यातर्पणं॥ आचमनं प्राणायामः। प्रयोग कृत्वा विष्णोः षोडशो
पचारपूजा॥ तद्विधिः। अद्यादि प्रयोगः। पुण्यकाले देशे च। गोत्रस्य प्रेतस्य प्रेतत्वविमु
क्त्यर्थं एकादशाहकर्मप्रारंभनिमित्तं। विष्णोः षोडशोपचारैः पूजनमहं करिष्ये॥
वामहस्ते दक्षिणे इत्यादिन्यासः। पूजा। जपः। भोजनसंकल्पः। ततो देहशुद्ध्यर्थं प्राजाप ११

त्यसंकल्पः॥ तत्प्रकारः। सुप्रोक्षितादि। मम देहशुद्ध्यर्थं प्राजापत्यप्रत्याम्नायं प्रतिप्राजा
पत्यं दशब्राह्मणभोजनपरिगणनया तावत्संख्याकं ब्राह्मणभोजननिष्क्रीभूतं द्रव्यं क
स्मै२ विप्र ब्राह्मणाय अहं संप्रददे। भगवान् पापहा विष्णुः प्रीयतां। अनेन प्राजापत्याचरणे
न मम देहशुद्धिरस्तु॥ गोत्रस्य प्रेतस्य ऊर्ध्वदेहिककर्मयोग्यता प्राप्तिः॥ शान्तिरस्तु॥ न्यूना
तिरिक्तं पूर्णमस्तु॥ ततो विष्णुतर्पणं॥ तस्य विधिः। आचमनं प्राणायामः। अद्यादि। गो
त्रस्य प्रेतस्य शास्त्रोक्तपुण्यफलावाप्त्यर्थं प्रेतत्वनिवृत्त्यर्थं सद्गतिप्राप्त्यर्थं विष्णोः सूक्तैः
आद्यंतयोः पुराणश्लोकत्रयावृत्त्या विष्णुतर्पणमहं करिष्ये॥ सहस्रशीर्षेति षोडशर्च
स्य सूक्तस्य नारायण ऋषिः पुरुषो देवता अनुष्टुप् छंदः। अंत्या त्रिष्टुप्। विष्णुतर्पणे विनि

योग०। सहस्रशीर्षा० ११॥ अनमो ३ गोविंद स्वं पथन्तु। माधव स्वं पयन्तु। हृषीके
शस्त्वं पथन्तु। अनंतादि सहस्रनामा विष्णु स्वं पयन्तु॥ (पुरुष एवेदमित्या
दियज्ञेन यज्ञमयजंत देवा इत्येनावत्पर्यंतं प्रत्यृचं अंजुली दद्या
त्। अंते इति सूक्तस्य अंते। अनमो ३ गोविंदादि सहस्रनामा वि
ष्णु स्वं पयन्तु॥ ततो अतो देवा इति षलर्चस्य सूक्तस्य मेधातिथि
ऋषिः विष्णुर्देवता आद्या देवी वा गायत्री छंदः। विष्णु०गा०।
अतो देवा०मि०। अनमो ३ गो विं०३। इदं विष्णुर्वि०दं। अ
नमो ३ त्र... गो०३। विष्णोर्नुकमिति षलर्चस्य सूक्तस्य दीर्घतमा ऋषिः वि ६७

ष्णुर्देवता त्रिष्टुप् छंदः। वि०गो०। विष्णोर्नुकं०य०॥ अनमो ३ इत्यादि। तूरि। अनमो ३ इत्यादि
प्रवः पांतमिति षलर्चस्य सूक्तस्य दीर्घतमा ऋषिः विष्णुर्देवता जागतं छंदः। वि०ग०। प्रवः
पांतमंधसो०ना। अनमोत्यादि। त्वेषमित्था०पदा। अनमोत्यादि॥ नवा मित्र इति पंचर्च
स्य सूक्तस्य दीर्घतमा ऋषिः विष्णुर्देवता जागतं छंदः। वि०ग०॥ नवा मित्रो०ता। अनमो ३
यः पूर्व्याय०जत। अनमो ३ सर्वा कर्मणो त्यष्टर्चस्य सूक्तस्य नरद्वाज ऋषिः इंद्र विष्णू दे
वता त्रिष्टुप् छंदः। विष्णुत०ग०। सर्वा कर्मणा०ता। अनमो ३ या विश्वासां०थो। अनमो ३
परो मात्रेति सप्तर्चस्य सूक्तस्य। वसिष्ठ ऋषिः विष्णुर्देवता त्रिष्टुप् छंदः। उरुं यज्ञाये तिति

स्व॰॥ ऐन्द्र्या॥ परोमात्रया॰ ऋ॰। अतसीउ नातविष्णो॰ न॰। अतसीउ नूमर्तइति मन्त्रस्य स्व
ऋस्य वसिष्ठऋषिः विष्णुर्देवता त्रिष्टुप्छन्दः वि॰ग॰॥ नूमर्तो॰ इ॰। अतसीउं विष्णो सु॰
न॰। अतसीउ दक्षिणा संकल्पः सुप्रोक्षितादिः। अस्य कृत विष्णुतर्पण कर्मणः प्रतिष्ठासि
ध्यर्थं दक्षिणां विष्णुप्रीत्यर्थं कस्मैर॰ दद्दे। भगवान्पा॰ तां ब्राह्मणभोजन संकल्पः। अनेन
कृत विष्णुतर्पणेन गोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिध कृच्छ्रषा निवृत्ति। शा॰ स्ति॥ वृषोत्सर्ग
कर्मयोग्यताप्राप्तिः॥ तदनंतरं स्नानं॥ ॥अथ वृषोत्सर्गः॥ ॥चतुरस्रं स्थंडिलं कृत्वा ईशा
न्यां मण्डिराग्नेः सप ...वं सर्वौषधिसम...न्वितं सप्तधान्योपरि रुद्रकलशं स्थापयित्वा प्र 64

तिदिशं समीपे चाश्वत्थं निखाय संस्थाप्य॥ आचमनं प्राणायाम॰॥ स्वस्त्ययनं। अद्यादि
प्रयोगमुच्चार्य वृषसंस्कारादिदृष्टविर्यदक्षिणांतं। कृत्वा। पिष्टमयं हविःपात्रं अंतर्धयि। उदु
ल्लेनुष्टं गृह्णामि इति त्रिः गृह्णीयात्। चतुर्थं ह्लीं। प्रोषालिमर्दनं। भूक्लेनुष्टमासाद
यामि। इत्यासादनं। भूक्लेत्वानुष्टं प्रोक्षामीति प्रोक्षणं। आलोड्य चरुविधिश्रयणं। स्यो
ना पृथिवीति कलशस्थापनं। श्रितात्रिधारणादि आज्यभागांतं कृत्वा। इहरतीत्यादि ति
स्त्रः आहुतीः स्रुवेण कृत्वा। इहरतिरिहरमध्वं स्वाहा। इहधृतिरिहस्वधृतिः स्वाहा। उपसृ
जं धरुणं मात्रे धरुणो मातरं धयं। रायस्पोषमस्मासु दीधरत्स्वाहा॥ ततो भरद्वाजः ऋषी
गायत्री। पूषागा अन्वेतुन इति चतुर्गृहीतं पोर्ष्णं चरुं कृत्वा पूर्ववत् स्वरितिरुद्रकलशं

ह्रयित्वा।। नुवनमसि सहस्रपोषमिंश। यत्वाश्चवोददता।। अन्तमस्यरिष्टमित्यानं गो
पायनं यावतीनामिदं करिष्यामित्यूयसीनामुत्तमां साम्नां क्रियासं।। इति मंत्रेण दक्षि
णे त्रिशूलं वामे चक्रं। वृषपदं ग्रीवायां यज्ञोपवीतादि यथाक्रममलंकरणादि कृत्वा रुद्र
कलशमादाय आपो हिष्ठेति तिसृभिर्वेन सूक्तेन वृषवत्सतरीणामभिषेकं कृत्वा ब्राह्मणं
पृथक् कृत्वा आचार्यः सहस्रशीर्षेति सूक्तं पठन् वृषं वत्सतरीश्चाग्निं परितश्चतुर्वा
रं प्रदक्षिणीकारयति। अग्नेः पश्चादुपविश्य प्रयोगमुच्चार्य सव्येन पुच्छमादाय कुशतूर्व
दर्भान् सर्वौषधीर्यवांश्च गृहीत्वा षोडशर्चेन पुरुषसूक्तेन तर्पणं कारयति। अंते च तस्मि
त्यादि निःक्षोकेश्च। ततो दक्षिणाभिमुख उपविश्य अपसव्यं कृत्वा पुच्छं करात्रे अधो ६९

मूलान् कृत्वा सर्वौषधितिलान् गृहीत्वा प्रेतमनुस्मरेत्।। पितृतीर्थेन गोत्र प्रेत वृ
षवत्सतरीपुच्छे तिलोदकं तत उपतिष्ठतु। एवं तर्पणं कुर्यात्।। सव्यं कृत्वा आचार्य वृषव
त्सरीणामुत्सर्गं कुर्यात्। अथ मंसुप्रोक्षितादिकं अद्यमुकनामीत्यंतं कृत्वा पश्चात् सव्ये
न। एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण। मा वः प्राप्त जनुषा सं विदाना
रायस्पोषेण समिषा मदेम। स्वाहा।। अनेन मंत्रेणोत्सरणं। ततो मयोभूरित्यनुमंत्रणं
कुर्यात्।। इति क्रमः।। एतं युवानमिति पठित्वा दक्षिणस्कंधेन प्रोञ्च्छं प्रेरयन्।। सुप्रो
क्षितादि। अपसव्यं कृत्वा गोत्रस्य प्रेतस्य प्रेतत्वविमुक्त्यर्थं वसुरुद्रादित्यलोक
प्राप्त्यर्थं च आत्मोत्कृष्ट एय फलावाप्त्यर्थं इमं वृषं वत्सतरीसंयुक्तं यथाशास्त्रं

कृतं वृषपदग्रीवविरचितं रुद्रदेवतं गंधमाल्यार्चितं एकादशाहे अद्यामुकस्य नाम्नि वृ
षस्य दक्षिणहस्ते उदकं निनयेत्। अयोध्याय मयोभूरित्यनुवाकशेषेणानुमंत्रये
त्। ततः स्विष्टकृतोदादि ब्रह्मविमोकांतं कृत्वा अस्य कर्मणः समृद्ध्यर्थं यथासंपन्ने
नान्नेन तृप्तिपर्यंतं भोजनेन पायसेन त्रीन् ब्राह्मणान् अहं तर्पयिष्ये। भगवत्याः कर्मा
गदेवताः प्रीयंतां। दक्षिणासंकल्पः। शान्तिं इश नीत्यादि। अस्य वृषोत्सर्गकर्मणो य
मस्तु। शास्त्रोक्तं० रस्तु। अनेन वृषोत्सर्गकर्मणा गोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिरस्तु॥
वसुरुद्रादित्यलोकप्राप्तिरस्तु॥ ततः स्नानं। देवपूजापूर्वकं एकादशाहश्राद्धं सर्वत्रा
पसव्येन॥ दर्भवटुं निधाय॥ सर्वाया० प्रेतश्राद्धे ब्राह्मणकार्यं० गोत्रप्रेत अवनेनिक्ष्व॥ ७०

एतद्वः पाद्यं। एष वोऽर्घः। पूजा। प्रेतेतिकादिष्टेभ्यो नमः। सद्यं आचमनं प्राणायामः। पुनराचम्य॥
अपवित्र इत्यादि देवताभ्यो महायोगिभ्य एव च। नमः ३ श्राद्धभूमौ गयां स्वयमेव० देशकाल
पात्रद्रव्यश्रद्धासंपत्। अपसव्यो दक्षिणाभि० एकादशाहश्राद्धे ०पवित्रता। तिलान् गृहीत्वा भू
रादि। तत्सवि०। यातु। मधुवाता मधु ३ इति जपित्वा तिलान् विकीर्य। अद्येत्यादि० गोत्रस्य प्रेत
स्य एकादशाहनिमित्तं प्रेतत्वविमुक्त्यर्थं क्षुत्तृषानिवृत्त्यर्थं शास्त्रोक्तपुण्यफलावाप्त्यर्थं प्रेतेतिको
द्दिष्टविधिना युष्मदनुज्ञया श्राद्धमहं करिष्ये। गोत्रप्रेत इदं ते आसनं। एकमर्घं। शंनोदेवी
ति पूरयित्वा। तिलोसीति तिलान् प्रक्षिप्य। अत्र चंदनादि अर्घस्यार्चनविधेः परिपूर्णतास्तु। टो

परिपवित्रं मुक्त्वा । हूजा । प्रेतिकादिष्टेभ्यो नमः । यादिव्या इत्यादि । गोत्रप्रेत एतत्ते अर्घ्यं ॥
सकलमर्घं निनयेत् । ततोन्यकुंपात्रं कुंधं तां लोकाः प्रेतसदनाः प्रेतसदनमसि प्रेतिका
दिष्टेभ्यः स्थानमसि ॥ ततो वटोपरि छत्रवंदनादि यथा दत्तं गंधाद्यर्चनं उपवीतं च गोत्रप्रेत
एतत्ते । वस्त्रादिसंकल्पस्य । समुदायेन तु पृथक् पृथक् । अर्चनविधेः परिपूर्णता । सव्यं आ
चमनं । अपसव्यं । अपहता । निहन्मि । भोजनसंकल्पः । अपहता पृथ्वी ते पात्रमित्यादि ॥
इदं ॰रे ॥ एतत्ते विष्णो अन्नं रक्षा उदकं नं । इदमन्नं यद्दत्तं यच्च दास्यामि तृप्तिपर्यंतं भोजनं यथा
दास्यामि नं आमान्नं सघृतं गोत्रप्रेत एतत्ते ॥ ततो गूढादि जपः । अद्येत्यादि ॰ गोत्रस्य प्रेतस्य ७१

एकादशाहनिमित्तस्य प्रेतिकोद्दिष्टविधेर्यत्कृतं ॰ संपन्नं ॥ एतद्धः सूर्यः । संकल्पसिद्धिः ।
पिंडपात्रे गूढादि जपः । समूलदर्भस्तरणं ॥ अवनेजनं । गोत्रप्रेत अवनेनिक्ष्व । ततः पिंडदा
नं ॥ गोत्रप्रेत एतत्ते । प्रत्यवनेजनं ॥ आच्छादनादि ॰ प्रेताय वासः । निवेद्य । अत्राच्छादनादि ॰ गो
त्रप्रेत पिंडार्चनं ते ॥ अत्रा ॰ पिंडस्यार्चनविधेः परिपूर्णता । अनेन पिंडदानेन गोत्रस्य प्रेतस्य
क्षुत्तृषानिवृत्तिः प्रेतत्वविमुक्तिः । सव्यं आचमनं ॥ सुप्रोक्षितादि । अपसव्यं । रजतदक्षिणानि
ष्क्रं ॰ या दास्यमानं द्रव्यं गोत्रप्रेत एतत्ते ॥ अक्षय्यकाले गोत्रस्य प्रेतस्य उपतिष्ठतां । पवित्रमा
स्तीर्य त्रिःस्त्रीमुदकं निनयेत् ॥ सव्यं । पुनर्दक्षिणा । अस्य हिरण्य ॰ च्छं । प्रेतश्राद्धे ब्राह्मणाय तुभ्य
महं संप्रददे ॥ अपसव्यं । नई कर्णे निरिति पिंडप्रक्षेपः ॥ वटोपरि उदकं मुक्त्वा । तृतीयघटिका ॥

अद्यादि प्रयोगः॥ गोत्रस्य प्रेतस्य एकादशाहश्राद्धं कृतं तस्य यः कश्चित् न्यूना॰र्सी॥ अनेन एका
दशाहश्राद्धकृतेन गोत्रस्य प्रेतस्य प्रेतत्व विमुक्तिः॥ कुंभदानस्या यथता प्राप्तिः। न्यूनातिरिक्तं
परिपूर्णं॥ अग्निरक्षणं। वस्त्रत्यागं॥ सचैलं स्नानं। अन्य वस्त्रं परिधाय॥ आचमनं प्राणायामः॥
अद्येत्यादि॰ पूर्ववत्॥ सुप्रोक्षितादि॥ गोत्रस्य प्रेतस्य प्रेतत्व विमुक्त्यर्थं क्षुत्तृषानिवृत्त्यर्थं दा
स्यमानं सतिलोदकुंभमेकं विष्णुप्रीत्यर्थं कस्मै२ संप्रददे भगवान् श्रीमहाविष्णुः प्रीयतां। एवमे
कं यमोद्देशेन। एवमेकं चित्रलेखकोद्देशेन। एवमेकं विचित्रलेखकोद्देशेन॥ अपसव्यं॥ गोत्रस्य प्रे
तस्य क्षुत्तृषानिवृत्त्यर्थं शास्त्रोक्तं॰र्थं यथा दास्यमानाः एकादश सतिलोदकुंभाः सोपस्कराः वि
ष्णुदेवताः गंधाद्यर्चिताः केभ्यश्चिद्ब्राह्मणेभ्यः दास्यमानाः गोत्र प्रेतते॥ सव्यं भगवान्पापहा ७२

विष्णुः प्रीयतां॥ अपसव्यं॥ एभिः सतिलोदकुंभदानैः गोत्रस्य प्रेतस्य प्रेतत्व विमुक्तिः॥
शास्त्रोक्त॰ त्रि॥ द्वादशाहकर्मयोग्यता प्राप्तिः॥ पूर्वं कृतस्य तद्दिवेतरण्यादिदानसंक
ल्पः॥ सव्येन॥ दानफलं अपसव्येन दद्यात्॥ सव्यं तीर्थदेवतानां प्रीत्यर्थं न्यूनातिरिक्तं प
रिपूर्णार्थं यथा दास्यमानं आमान्नं कस्मैचिद्ब्राह्मणाय अहं संप्रददे भगवत्यः तीर्थदे
वताः प्रीयतां॥ ततः स्नानं कृत्वा गृहं गच्छेत्॥ एवमेव स्त्रियामपि॥ ततो द्वादशाहे स्नानं॥
नित्यं कृत्वा गोत्रस्य प्रेतस्य इत्यादि द्वादशाहकर्मप्रारंभनिमित्तं पूर्ववत् षोडशोपचा
रपूजां कृत्वा द्वादशाहप्रवृत्तीनि पंचदश श्राद्धानि एकादशाहवत् प्रयोगः॥ अद्यादि॰

गो०प्रे०र्थं द्वादशाब्दवृत्तीनि एकादशमासिकश्राद्धानि त्रिपाक्षिकन्यूनषाण्मासिक
ऊनाब्दिकसपिण्डनानि पंचदशश्राद्धानि द्वादशाहकृतानि मित्रानि प्रातिकोद्दिष्टवि
धिना एकतंत्रेणाहं करिष्ये॥ द्वितीयपक्षे छायां द्वादशाब्दवृत्तीनां एकादशमासिकश्रा
द्धानां त्रिपक्षिकन्यूनषाण्मासिकऊनाब्दिकसपिण्डनानां एवं पंचदशश्राद्धानां प्रतिको
द्दिष्टविधिना यत्कृतं तन्न कृ०न्न एतदस्त्यर्थः॥ तृतीयपक्षछायां प्रेतैकोद्दिष्टविधिनायः
कश्चित्॥ इति विशेषः॥ एनिः श्राद्धैः गो०प्रे०तु०शा०त्रि०न्यू०णां॥ द्वादशाब्दकेन दान
योग्यताप्राप्तिः॥ स्वर्इंकर्णोति रितिविसर्जनं॥ श्राद्धसमाप्तिरियं॥ ततः स्नानं॥ शुक्लवास ७३

समीपरिधाय॥ संक्षेपेण दवहूर्जां त्वाव्रह्मेत्यादि पूर्ववत्प्रयोगः॥ सद्येन द्वादश
मासान्नोदकेन नित्यान्न नित्यघट नित्यान्नदीप संकल्पमहं करिष्ये॥ अपसव्यं गो०
प्रे०तु०प्रे०नि०र्थं केन्याचिद्ब्राह्मणेभ्यो दास्यमानाः द्वादशमासान्नोदकेनाः मा पस्क
राः विष्णुदेवताः गोत्रप्रेततृप्ते। एनिर्द्वादशमासान्नोदकेन दानेः गोत्रस्य प्रेतस्य तुष्ट
ष्णानिवृत्तिः॥ शा०प्ति॥ नित्यान्नदानयोग्यताप्राप्तिः गोत्रस्य प्रेतस्य त्रयोदशाब्दवृ
त्तिसंवत्सरं यावत् अद्य दरहः यममार्गे तुष्ट०र्थं अष्टचत्वारिंशदधिकशतंत्रय ब्राह्मण
भोजन निष्क्रीतं तं द्रव्यं कस्मै रविद्ब्राह्मणाय दास्यमानं गोत्रप्रेतमत्ता॥ अशक्तेः नित्या

न्ननिष्क्रयेनयथासंपन्नंद्रव्यंगोत्रप्रेततृप्तो।अनेननित्यान्नदानेनगोत्रस्यप्रेतस्यअद
रक्षःक्षुत्तृषानिवृत्तिः।शा०प्रीति।।नित्यघटयोग्यताप्राप्तिः।ततोनित्यघटसंकल्पः।पूर्ववत्
गोत्रस्यप्रेतस्यअष्टचत्वारिंशत्यधिकशतत्रयसान्नोदकुंभाःसोपस्कराःगंधाद्यर्चिताः
विष्णुदेवताःतन्निष्क्रीभूतंयथादास्यमानंद्रव्यंगोत्रप्रेततृप्तो।सत्यं।भगवान्पापहाविष्णुः
प्रीयतां।अपसव्यं।अनेनसोपस्करनित्यघटदानेनगोत्रस्यप्रेतस्यअद्धरक्षःक्षुत्तृषा
निवृत्तिः।प्रेतत्वनिवृत्तिः।।नित्यदीपदानयोग्यताप्राप्तिः।।नित्यदीपसंकल्पः।गोत्रस्य
प्रेतस्यपरलोकेतमोनिवृत्त्यर्थंशा०र्थंभूताद्वप्रवृत्तिसंवत्सरंयावत्अद्धरक्षःयममा ७४

र्गेतमोनिवृत्त्यर्थंकस्मैचिद्ब्राह्मणायदास्यमानोनित्यदीपःसोपस्करःविष्णुदेव
ताःगंधाद्यर्चिततन्निष्क्रीभूतंयथासंपन्नंद्रव्यंकस्मैचिद्ब्राह्मणायअहंसंप्रददे।।
गोत्रप्रेततृप्तो।सत्यं।भगवान्श्रीविष्णुःप्रीयतां।अनेननित्यदीपदानेनगोत्रस्यप्रेतस्य
परलोकेतमोनिवृत्तिः।सपिंडीकरणयोग्यताप्राप्तिः।ततःस्नानं।पूर्वेनकृत[illegible]
द्विऋणधेनुसंकल्पः।गोत्रस्यप्रेतस्यऋणत्रयविमोचनार्थंयथादास्यमानांऋणधेनु
संज्ञकांगांयथोपस्करसहितांकस्मैचिद्ब्राह्मणायाहंददास्येइत्यादि।।ततःस्नानं।।
।।अथसपिंडीकरणं।।पूर्वंविश्वेषांदेवानांपादप्रक्षालनं।पश्चात्पितृणां।पश्चादेको
द्दिष्टः।।अद्येत्यादिगोत्रस्यप्रेतस्यपितृत्वप्राप्त्यर्थंसपिंडीकरणनिमित्तंगोत्राणांपि

ह पितामहप्रपितामहानां विश्वेदेवपूर्वकं सैकोद्दिष्टं पार्वणैकविधिनायुष्म
दनुज्ञया श्राद्धमहं करिष्ये। शंनो देवीति अर्घपात्राणि पूरयित्वा अर्घार्चनविधिं कृ
त्वा विश्वादेवार्घं दत्वा ततः प्रेतस्यार्घस्य चतुर्थांशं दत्वा ये समाना इति मंत्र[illegible] प
ठित्वा गोत्रस्य प्रेतस्य अर्घांशः गोत्रस्य तत्पितुः अमुकशर्मणः अर्घेण सह संयुज्य
तां। एवं पितामहप्रपितामहाभ्यामपि संयोजनं। ततः पित्रादिभ्योऽर्घदानं। अर्चासं
कल्पः। भोजनसंकल्पः। ततः पिंडदानं। चतुर्भ्यो दत्वा प्रेतपिंडस्यावनेजनादिनैवेद्य
संकल्पांतं कृत्वा आवश्य प्रेतपिंडं सुवर्णेन त्रिधा विभज्य ये समाना इति पूर्ववत् गो
त्रस्य प्रेतस्य पिंडांशः गोत्रस्य तत्पितुः अमुकशर्मणः पिंडेन सह संयुज्यतां। एवं पि ७५

णीकृत्य चितामारोहयेत्सती। चरणौ हृदये भर्तुः कृत्वा ध्यात्वा जगदीश्वरं। इमानारीरविधवाः
सुपत्नीरांजनेन सर्पिषा संविशंतु। अनश्रवो अनमीवाः सुरत्ना आरोहंतु जनयो योनि
मग्रे। अनयर्चा दृढवरादिना चितामारोहयति॥ ॥अथ प्रार्थनामंत्रः॥ ॥इदं शरीरं मक
लं मदीयं दग्धं श्मशाने कुरु दिव्यमाशु। यथा स्वभर्तुः कुरु दिव्यदेहं भर्तुः समीपं भगवा
न्व्रजामि। किं मया न कृतं साधु न वेद्मि दिवानद्य इदं शरीरमालिंग्य प्रविशामि हुताश
नं। इत्युक्त्वा सा हसंती हृष्टा करतालीः प्रदापयेत्। हरिनामोच्चारणं तया स्वजनैश्च कार्यं॥
॥ ॥इति सहगमनविधिः॥ ॥सहगमनफलातिशयः॥ ब्रह्मघ्नो वा कृतघ्नो वा सुरापी ७८

ग्नि विष्णुरूपी सनातनः। परलोकसहायार्थं गृहाणार्घं नमोस्तु ते। ततः सूर्यार्घः। एष
अर्घो मया दत्तः सूर्यसान्निन्त्चदयतः। प्रसादं कुरु मे देव गृहाणार्घं नमोस्तु ते॥ ॥अ
॥अथ स्तुतिः॥ त्वं ब्रह्मा त्वं च विष्णुस्त्वं विरुद्रस्त्वं प्रजापतिः। त्वं सूर्यो वसवश्चाष्टौ परमा
त्मा त्वामवद्धि। त्वमेव शरणं विष्णो शरणं तु पतिर्मम॥ स्वर्गे वा नरके वात्र यत्र यत्र ग
मिष्यसि। तत्र तत्र ह्यहं दृष्टे स्वर्गमिष्यसि वा सुवा ब्रह्महत्यादिभिः पापैर्मुक्तामा त्वया नि
यमालयात्। अहं ब्रह्मा ह्यहं विष्णुरहं सूर्यश्च दिक्पतिः। आदित्यवंशवनलोथ वायुर्द्यौ
र्भूमिरापोप्यहर्निशं च। एते समस्ता मम साक्षिणस्तु थं तु मे देववराश्च सर्वा। सह प्रवदति

श्रस्य कुर्णपं त्ततन चितामध्ये सयत्नतः। सती शोचादिकं कृत्वा॥ अद्येत्यादि० अस्मि
न्तीर्थे तत्र सिद्धगमनार्थं स्नानमहं करिष्ये॥ इति प्रयोगमुच्चार्य स्नानानंतरं कौसुंभ
वस्त्रं परिधाय कुंकुमांजनवस्त्रा विभूषिता विष्णुं ध्यायंती चितासमीपमागत्य पिंडदा
नं दद्यात्। स्वहस्तेन प्रतिनिधिकेन वा। नाविताक्रांतनिमित्तं अमुकसगोत्रायै मह्यं पर
लोके एष पिंड उपतिष्ठतु विष्णोः प्रसादात् प्रतिनिधिकेन वा। गोत्रायै देविदायै मह्यं प
रलोकगतायां त्वयि नाविताक्रांतिनिमित्तं एष पिंडो मया दत्तस्तस्योपतिष्ठतु। एवं सर्वे
षु निमित्तस्थानेषु देयं। चितार्घप्रदानवच फलेश्च विविधैः स्तुतिः। चिताञ्जो भगवान ७७

पायसं घृतमधुमिश्रं तु भुंक्ते ॥ सती यास्व चतुष्टये कामं यते ॥ विधवत्वं मा दिनं कदापि स्यात्प
त्या वियोगा न मम भ्रातृवा एवं । वंध्यात्वमेवं न कदापि वास्तु । दौर्भाग्यकं न कदापि वास्तु ॥
बंधुस्तान् प्रणम्य विसृजेत् । हर्षमनाः नृत्यगतमनसा स्वगृहं अच्छातिरात्री यदि परावि
वर्द्धयेत् । अग्नेस्तु त्वेति मंत्रेण वर्द्धवामारोहयेत् । अथवा श्मशानं नीयमानं तु भर्त्तारमु
पयाति या ॥ पदे पदे यज्ञफलं लभते नात्र संशयः ॥ पदातिर्वा सती गच्छेदित्यर्थः ॥ श्मशा
न्यशी ग्रंदरिमुञ्चरंती पथि दृष्टेऽतिरवा किरंती भर्तृपादौ याश्मशाने तुलको द्रुमं समस्त
हस्तप्रमाणा तु स्मृता काष्ठमयी कुटी । दक्षिणस्यां दिशि द्वारं चितायां मुनिभिः स्मृतं । वि

मलिनादूरशा । मृतं म्रियेत वा त्यौ सा स्त्री ज्ञेया पतिव्रता ॥ न म्रियेत समं भर्त्रा ब्राह्मणी
शोकमोहिता । प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी ॥ यदि भर्त्ता न क्षा म्रियेत त
दा महत्फलं लभेत् ॥ यावच्चाग्नौ मृतपत्न्यो न द्यात्मानं दद्देत्तत् कचित् । तावन्न मुच्यते
नारी स्त्रीशरीरात्तु कर्हिचित् । पतिं कंठगतप्राणं दृष्ट्वा चैव पतिव्रता । संकल्प्य चात्म
नः प्राणान्निदं वचनमब्रवीत् । देवीः सवादितामह्यं पतित्वे सर्वदैवत । त्वया सह ग
मिष्यामि भर्त्रा त्विं चान्यजन्मनि ॥ इति संकल्प्य सती कृत्या स्वशरीरत्यादानन्तरायादि क
त्वा । ततः कुंकुमांजनमुकुटाद्यैः स्वशरीरमलंकृत्य चतसृभिः सौवासिनीभिः सं ७६

नामहप्रपितामह्योः। ततःप्रत्यवनेजनादिसर्वंदर्शवत्॥ अतऊर्ध्वंप्रेतश्राद्धान
वक्तव्याः॥ स्वधावाचनं एकोद्दिष्टस्यहस्ते। श्राद्धंसमाप्य। मोक्षधेनुसंकल्प्य॥ अथस्त्रि
यस्सपिंडीकरणं। अद्येत्यादिगोत्रायाः प्रेतायाः अमुकीदविदायाः सपिंडीकरण
निमित्तंगोत्राणांमातृपितामहीप्रपितामहीनां अमुकीशदविदानां विश्वेदेवपूर्व
कंमिकोद्दिष्टंयुष्मदनुज्ञयाश्राद्धमहंकरिष्ये॥ शेषंदर्शवत् ब्राह्मणभोजनं॥ ॥छ।
॥ ॥इत्यूर्ध्वदैहिकीक्रियाविधिः॥ ॥अथसहगमनविधिः॥ ॥मिताक्षरापारि
जातयोः॥ मृतानर्त्तरिब्रह्मचर्यं॥ तदन्वारोहणंवति॥ आर्त्तार्त्तिमुदितेहृष्टाप्रोषित

वायथाविधः॥ पुनात्यविधवानारीतमादायमृतानुया। यदिप्रविष्टोनरकंबद्धःपाशैस्सु
दारुणैः। संप्राप्तायातनास्थानंगृहीतायमकिंकरैः। तिष्ठतोविवशोदीनोवेद्यमानस्स्व
कर्मभिः। व्यालग्राहीयथासर्पंबिलादुद्धरतेबिलात्॥ तद्वदुद्धृत्यसानारीतनिवसह
मोदते। तिस्रःकोट्योर्द्धकोटीचयानिलोमानिमानसे। तावत्कालंवसेत्स्वर्गेभर्त्तारंयानु
गच्छति। मृतान्वर्त्तरियानारीसमारोहेद्धुताशनं। अरुंधतीसमाचारास्वर्गलोकमहीयते।
मातृकंपैतृकंचैवयस्यकन्याप्रदीयते। कुलत्रयंपुनात्येषाभर्त्तारंयानुगच्छति। तत्रास
न्देपरमास्तूयमानाप्सरोगणैः। क्रीडतेपतिनासार्द्धंयावदिंद्राश्चतुर्दश। त्रार्रराथस्मृ
तीपुराणपुण्यफलैःसमा॥ अन्वारोहणानुजीवंतीसाध्वीनदेहितायसा॥ अयंत्रसंवसि

स्त्रीणां मगर्भिणीनां मबालपत्यानामवंडास्त्नं साधारणो धर्मः॥ ब्राह्मणीनां च पृथ
क्चित्यां निषेधः॥ एकचित्यां न दोषः॥ पृथक्चित्या मारूढः॥ न वे ब्रागंउ॰ मर्द्दनीति
विशेषोपादानात्॥ ब्राह्मणीभिरेकचितिसमारोहणं कार्यमेव॥ अगर्भिणीरबाल
पत्याभिस्स्वर्गाभिलाषिणीभिः॥ गर्भिण्यादिभिर्न तु॥ मातृकाभिर्ब्रह्मचर्यपक्षोंगी
कर्त्तव्यः॥ मोक्षाभिलाषिणीभिरनित्याल्पसुखस्वर्गार्थमायुर्व्ययो न कर्त्तव्यः॥
स्वमिर्छनीभिर्विप्रस्त्रीभिः॥ एकचित्यां शरीरव्ययः॥ ब्राह्मण्यव्यतिरिक्तानां पृथक्
चित्यामपि न दोषः॥ उदकया सांश्चतुरो नुंके॥ वैधव्यं मम हरहर स्वाहा॥ पति
वियोगमे माकुरु माकुरु स्वाहा॥ वंध्यात्वदोषं नाशय नाशय स्वाहा॥ दौर्भाग्यं मम ना ७९

तृयान्मा तृयास्वाहा॥ एतेउदकयामंत्राः॥ ॥इति सहगमनविधिः॥ समाप्त॥
॥शुभं भवतु॥ ॥कल्याणं भूयात्॥ ॥[illegible]संवत् १[illegible]७ वर्षे कार्तिकमासे शु
क्लपक्षे अष्टम्यां तिथौ बुधदिने अद्येह श्रीसूर्यपुरवास्तव्य आभ्यंतरनागरज्ञा
तीय द्विवेदी श्री ६ विश्वनाथसुन्नाईजी तेन लिखितमस्ति॥ आत्म हरी तापुत्र पौ
त्रादिकपठनार्थं॥ ॥श्रीः॥ ॥ठ॥ ॥श्रीः॥ ॥ठ॥ ॥श्रीः॥ ॥ठ॥ ॥श्री
सर्वेपि सुखिनः संतु सर्वे संतु निरामयाः॥ सर्वे भद्राणि पश्यंतु मा कश्चिद्दुःखमाप्नु
यात्॥ ॥शिवमस्तु॥ ॥ ॥श्री॥ ॥ठ॥ ॥श्रीः॥ यादृशामितिन्यायात् ८०

